सुदणाणं पुण णाणी भणंति स एव पूर्वोक्तात्मा श्रुतज्ञानावरणीयक्षयोपशमे सति यन्मूर्तामूर्तं वस्तु परोक्षरूपेण जानाति तत्पुनः श्रुतज्ञानं ज्ञानिनो भणन्ति । तच्च कथंभूतं । **लद्धी य भावणा चेव** लब्धिरूपं च भावनारूपं चैव । पुनरपि किंविशिष्टं । **उवओगणयवियप्पं** उपयोगविकल्पं नयविकल्पं च उपयोगशब्देनात्र वस्तुग्राहकं प्रमाणं भण्यते नयशब्देन तु वस्त्वेकदेशग्राहको ज्ञातुरभिप्रायो विकल्पः । तथा चोक्तं । नयो ज्ञातुरभिप्रायः । केन कृत्वा वस्तुग्राहकं प्रमाणं वस्त्वेकदेशग्राहको नय इतिचेत्। **णाणेण य** ज्ञातृत्वेन परिच्छेदकत्वेन ग्राहकत्वेन **वत्थु अत्थस्स** सकलवस्तुग्राहकत्वेन प्रमाणं भण्यते अर्थस्य वस्त्वेकदेशस्य । कथंभूतस्य । गुणपर्यायरूपस्य ग्रहणेन पुनर्नय इति । अत्र विशुद्धज्ञानदर्शनस्वभावशुद्धात्मतत्त्वस्य सम्यक्श्रद्धानज्ञानानुचरणाभेदरत्नत्रयात्मकं यद्भावश्रुतं तदेवोपादेयभूतपरमात्मतत्त्वसाधकत्वान्निश्चयेनोपादेयं तत्साधकं बहिरंगं तु व्यवहारेणेति तात्पर्यं ॥ २ ॥

ओहिं तहेव घेप्पदु देसं परमं च ओहिसव्वं च ।
तिण्णिवि गुणेण णियमा भवेण देसं तहा णियदं ॥ ३ ॥

ओहिं तहेव घेप्पदु अयमात्मावधिज्ञानावरणक्षयोपशमे सति मूर्तं वस्तु यत्प्रत्यक्षेण जानाति तदवधिज्ञानं भवति यावत् यथापूर्वमुपलब्धिभावनोपयोगरूपेण त्रिधा श्रुतज्ञानं व्याख्यातं तथा सान्वयनिर्भावनां विहाय द्विधा गृह्यतां ज्ञायतां भवद्भिः **देसं परमं च ओहिसव्वं च** अथवा देशावधिपरमावधिसर्वावधिभेदेन त्रिधावधिज्ञानं किंतु परमावधिसर्वावधिद्वयं चिदुच्छलननिर्भरानन्दरूपपरमसुखामृतरसास्वादसमरसीभावपरिणतानां चरमदेहतपोधनानां भवति । तथाचोक्तं । "परमोही सव्वोही चरमसरीरस्स विरदस्स" **तिण्णिवि गुणेण णियमा** त्रयोऽप्यवधयो विशिष्टसम्यक्त्वादिगुणेन निश्चयेन भवंति **भवेण देसं तहा णियदं** भवप्रत्ययेन देवनारकाणां स देशावधिरेव नियमनाभिप्रायः ॥ ३ ॥

विउलमदी पुण णाणं अज्जवणाणं च दुविह मणणाणं ।
एदं संजमलद्धी उवओगे अप्पमत्तस्स ॥ ४ ॥

विउलमदी अयमात्मा पुनः मनःपर्ययज्ञानावरणक्षयोपशमे सति परकीयमनोगतं मूर्तं

देशत्वादनन्यत्व । यथा त्वन्यतविप्रकृष्टयो सह्यविन्ध्ययोरत्यतसंनिकृष्टयोश्च मिश्रितयो स्तोयपयसोर्विभक्तप्रदेशत्वलक्षणमन्यत्वमनन्यत्व च । न तथा द्रव्यगुणाना विभक्तप्रदेशत्वाभावादन्यत्वमनन्यत्व चेति ॥ ४५ ॥

व्यपदेशादीनामेकातेन द्रव्यगुणान्यत्वनिबधनत्वमत्र प्रत्याख्यातम्,—

ववदेसा सठाणा सखा विसया य होति ते बहुगा ।
ते तेसिमणण्णत्ते अण्णत्ते चावि विज्जते ॥ ४६ ॥

व्यपदेशा सस्थानानि सख्या विषयाश्च भवन्ति ते बहुका ।
ते तेषामनन्यत्वे अन्यत्वे चापि विद्यते ॥ ४६ ॥

यथा देवदत्तस्य गौरित्यन्यत्वे षष्ठीव्यपदेश, तथा वृक्षस्य शाखा द्रव्यस्य गुणा इत्य

भानन्यत्वमन्य च नेच्छति "तच्चिरगीद हि वा तन्ति"मिति पाठातर तद्विपरीताभ्या वा ताभ्या परस्परसापेक्षान्यत्वान्यत्वाभ्या विपरीते निरपेक्ष तद्विपरीते ताभ्या तद्विपरीताभ्या वा कृत्वा तेषा द्रव्यगुणानामनन्यत्वान्यत्वे नेच्छन्ति किंतु परस्परसापेक्षत्वेनेच्छन्तीत्यर्थ । अत्र गाथासूत्रे विशुद्धज्ञानदर्शनस्वभावात्मतत्त्वादन्यत्वरूपा ये विषयकषायास्त रहितानां तस्मादेव परमचैतन्यरूपात् परमात्मतत्त्वात् यदनन्यत्वस्वरूप निर्विकल्पपरमाह्लादकरूपसुखामृतरसास्वादानुभवन तत्सहितानां च पुरुषाणां यदेव लोकाकाशप्रमितानन्यद्वयशुद्धप्रदेश सह केवलज्ञानादिगुणानामनन्यत्व तदुपादेयमिति भावार्थ ॥ ४५ ॥ इति गुणगुणिनो सक्षेपेण भेदाभेदव्याख्यानमुख्यत्वेन गाथात्रय गत । अथ व्यपदेशादयो द्रव्यगुणानामेकान्तेन भिन्नत्व न साधयन्तीति समर्थयति,— **ववदेसा सठाणा सखा विसया य** व्यपदेशा सस्थानानि सख्या विषयाश्च **होंति** भवन्ति त ते पूर्वोक्तव्यपदेशादय कतिसख्योपेता **बहुगा** प्रत्येक बहव **ते तेसिमणण्णत्ते विज्जते**

हिमाचल कहीं है और विन्ध्याचल कहीं है इसको नाम भेद कहते हैं तथा मिले हुये दुग्धजलको अभेद कहते हैं परमार्थसे जल जुदा है दुग्ध जुदा है । लोकव्यवहारसे एक माना जाता है क्योंकि दुग्ध और जलमें प्रदेशोंकी ही एकता है । इसप्रकार लोकव्यवहार कथित गुणगुणीमें भेदाभेद नहीं मानें किंतु प्रदेशभेदरहित जो गुणगुणीमें कथंचित्प्रकार भेद अभेद परमार्थ दिखानेकेलिये कृपावत आचार्योंने दिखाया है सो भले प्रकार जानना चाहिये ॥ ४५ ॥ आगे व्यपदेश, सस्थान, सख्या, विषय, इन चार भेदोंसे सर्वथा प्रकार द्रव्य और गुणमें भेद दिखाते हैं,—[**तेषा**] उन द्रव्य और गुणोंके [**ते**] जिनसे गुणगुणीमें भेद होता है वे [**व्यपदेशा**] कथनके भेद और [**सस्थानानि**] आकारभेद [**सख्या**] गणना [**च**] और [**विषया**] जिनमें रहै ऐसे आधार भाव ये चार प्रकारके भेद [**बहुका**] बहुत प्रकारके [**भवन्ति**]

---

१ अन्यतामध्यया मिश्रितया ।

नन्यत्वेऽपि । यथा देवदत्त फलमङ्कुशेन धनदत्ताय वृक्षाद्वाटिकायामवचिनोतीत्यन्यत्वे कारकव्यपदेश । तथा मृत्तिका घटभाव स्वय स्वेन स्वस्मै स्वस्मात् स्वस्मिन् करोतीत्यात्माऽऽत्मानमात्मनाऽऽत्मने आत्मन आत्मनि जानातीत्यनन्यत्वेऽपि । यथा प्रांशो देवदत्तस्य प्रांशुर्गौरित्यन्यत्वे सस्थान । तथा प्रांशोर्वृक्षस्य प्रांशु शाखाभरो, मूर्तद्रव्यस्य मूर्ता गुणा इत्यनन्यत्वेऽपि । यथैकस्य देवदत्तस्य दश गाव इत्यन्यत्वे सख्या । तथैकस्य

ते व्यपदेशादयस्तेषा द्रव्यगुणाना कथचिदनन्यत्वे विद्यते । न केवलमनन्यत्वे विद्यते । अन्यत्वे चापि कथचिदन्यत्वे चापि । नैयायिका किल वदन्ति द्रव्यगुणाना यद्येकान्तेन भेदो नास्ति तर्हि व्यपदेशादयो न घटते तत्रोत्तरमाह । द्रव्यगुणाना कथचिद्भेदे तथैवाभेदेऽपि व्यपदेशादय सतीति । तद्यथा । षट्कारकभेदेन सज्ञा द्विविधा भवति देवदत्तस्य गौरित्यन्यत्व व्यपदेश, तथैव वृक्षस्य शाखा जीवस्यानतज्ञानादिगुणा इत्यनन्यत्वेपि व्यपदेश । कारकत्व कथ्यते—देवदत्त कर्ता फल कर्मतापन्नमकुशेन करणभूतेन धनदत्ताय निमित्त वृक्षात्सकाशाद्वाटिकायामधिकरणभूतायामवचिनोतीत्यन्यत्वे कारकत्वं तथैवात्मा कर्तात्मान कर्मतापन्नमात्मना करणभूतेनात्मने निमित्तमात्मन सकाशादात्मन्यधिकरणभूते ध्यायतीत्यनन्यत्वेपि कारकसज्ञा । दीर्घस्य देवदत्तस्य दीर्घो गौरित्यन्यत्वे सस्थान दीर्घस्य वृक्षस्य दीर्घशाखाभार मूर्तद्रव्यस्य मूर्ता गुणा इत्यभेद च सस्थान । सख्या कथ्यते । देवदत्तस्य दशगाव इत्यन्यत्वे सख्या तथैव वृक्षस्य दशशाखा द्रव्यस्यानतगुणा इत्यभेदेऽपि । विषय कथ्यते—गोष्ठे गाव इति भेद विषय तथा द्रव्ये गुणा इत्यभेदेऽपि । एव व्यपदेशादयो भेदाभेदाभ्या घटते तेन कारणेन द्रव्यगुणानामेक

होते हैं और [ते] ये व्यपदेशादिक चार प्रकारके भेद [अनन्यत्वे] कथंचित्प्रकार अभेदभावमें [च] और [अन्यत्वे] कथंचित्प्रकार भेद भावमें [अपि] भी [विद्यन्ते] प्रवर्ते हैं । भावार्थ—ये चार प्रकारके व्यपदेशादिक भाव अभेदमें भी हैं और भेदमें भी हैं । इनकी दो प्रकारकी विवक्षा है जब एक द्रव्यकी अपेक्षा कथन किया जाय तब तो ये चार भाव अभेदकथनकी अपेक्षा कहे जाते हैं और जब अनेक द्रव्यकी अपेक्षा कथन किया जाय तब ये ही व्यपदेशादिक चार भाव भेदकथनकी अपेक्षा कहे जाते हैं । आगे ये ही दोनों भेद दृष्टान्तसे दिखाये जाते हैं । जैसे किसी पुरुषकी गाय कहना, यह भेदमें व्यपदेश है वैसे ही वृक्षकी शाखा, द्रव्यके गुण, यह अभेदमें व्यपदेश जानना । और यह व्यपदेश षट्कारककी अपेक्षा भी है सो दिखाया जाता है । जैसे कोई पुरुष फलको अंकुशसे धनदत्त पुरुषके निमित्त वृक्षसे वाटीमें तोड़ै है यह भेदमें व्यपदेश है । और मृत्तिका जैसे अपने घटभावको आपकर आप निमित्त आपमें आपसे करै है, तैसें ही आत्मा आपको अपनेद्वारा अपने निमित्त आत्मा

१ पुरुष २ गुण ३ पुरुषकी गाय ४ मट्टन् ।

वृक्षस्य दश शाखा , एकस्य द्रव्यस्यानन्ता गुणा इत्यनन्यत्वेऽपि । यथा गोष्ठे गाव इत्य न्यत्वे विषय । तथा वृक्षे शाखा, द्रव्ये गुणा इत्यनन्यत्वेऽपि । ततो न व्यपदेशादयो द्रव्यगुणाना वस्तुत्वेन भेद साधयन्तीति ॥ ४६ ॥

वस्तुत्वभेदाभेदोदाहरणमेतत्,—

> णाण धण च कुव्वदि धणिण जह णाणिण च दुविधेहिं ।
> भण्णंति तह पुधत्त एयत्त चावि तच्चण्हू ॥ ४७ ॥
>
> ज्ञान धन च करोति धनिन यथा ज्ञानिन च द्विविधाभ्या ।
> भणति तथा पृथक्त्वमेकत्व चापि तत्वज्ञा ॥ ४७ ॥

नेन भेद न साधयन्तीति । अत्र गाथाया नामकर्मोदयजनितनरनारकादिरूपव्यपदेशाभावेऽपि शुद्धजीवास्तिकायशब्देन व्यपदेश्य वाच्य निश्चयनयेन समचतुरस्रादिषट्संस्थानरहितमपि व्यवहारेण भूतपूर्वकन्यायेन किंचिदूनचरमशरीराकारेण संस्थान । केवलज्ञानाद्यनन्तगुणरूपेणानन्तसंख्यानमपि लोकाकाशप्रमितासंख्येयशुद्धप्रदेशरूपेणासंख्यातसंख्यान पञ्चेन्द्रियविषयसुखरसास्वादरतानामविषयमपि पञ्चेन्द्रियविषयातीतशुद्धात्मभावनोत्पन्नवीतरागसदानन्दैकसुखरूपसर्वात्मप्रदेश-परमसमरसीभावपरिणतध्यानविषय च यच्छुद्धजीवास्तिकायस्वरूप तदेवोपादेयमिति तात्पर्य ॥ ४६ ॥ अथ निश्चयेन भेदाभेदोदाहरण कथ्यते—णाण धण च कुव्वदि ज्ञान कर्तृ धन च कर्तृ करोति । किं करोति । धणिण णाणिण च धनिन ज्ञानिन च करोति दुविहेहिं द्वाभ्या नयाभ्यां व्यवहारनिश्चयाभ्या जह यथा भण्णंति भणन्ति तह तथा । किं भणन्ति ।

आपमें जाने है सो यह अभेदमें व्यपदेश जानना । और जैसें बडे पुरुषकी गाय बडी है, यह भेद संस्थान है वैसे ही बड़े वृक्षकी बडी शाखा, मूर्तीक द्रव्यके मूर्तीक गुण यह अभेद संस्थान जानना । और जैसें किसी पुरुषकी दशगौवें हैं ऐसे कहना सो भेदसंख्या है तैसें ही एक वृक्षकी दशशाखायें, एक द्रव्यके अनंतगुण, यह अभेद संख्या जाननी । और जैसें गोकुलमें गाय है, ऐसा कहना यह भेद विषय है तैसें ही वृक्षमें शाखा द्रव्यमें गुण यह अभेद विषय है । व्यपदेश संस्थान संख्या विषय ये चार प्रकारके भेद द्रव्यगुणमें अभेदरूप दिखाये जाते हैं, अन्यद्रव्यसे भेदकर दिखाये जाते हैं । यद्यपि द्रव्यगुणमें व्यपदेशादिक कहे जाते हैं तथापि वस्तुके विचारसे नहीं हैं॥४६॥

आगें भेद अभेद कथनका स्वरूप प्रगटकर दिखाया जाता है;—[यथा] जैसें [धन] द्रव्य सो [धनिन] पुरुषको धनवान [करोति] करता है अर्थात् धन जुदा है पुरुष जुदा है परंतु धनके संबधसे पुरुष धनी वा धनवान ऐसा नाम पाता है [च] और [ज्ञान] चैतन्यगुण जो है सो[ज्ञानिन] आत्माको ज्ञानी' ऐसा नाम कहलाता है ज्ञान

१ गाव इत्यस्मिन् गोष्ठ तथा स्थान तस्मिन् ।

यथा धन भिन्नास्तित्वनिर्वृत्तम् भिन्नास्तित्वनिर्वृत्तस्य, भिन्नसंस्थान भिन्नसंस्थानस्य, भिन्नसंख्य भिन्नसंख्यस्य, भिन्नविषयलब्धवृत्तिक भिन्नविषयलब्धवृत्तिकस्य, पुरुषस्य धनीति व्यपदेश पृथक्त्वप्रकारेण कुरुते । यथा च ज्ञानमभिन्नास्तित्वनिर्वृत्तमभिन्नास्तित्व निर्वृत्तस्याभिन्नसंस्थान अभिन्नसंस्थानस्याभिन्नसंख्यमभिन्नसंख्यस्याभिन्नविषयलब्धवृत्तिकम भिन्नविषयलब्धवृत्तिकस्य पुरुषस्य ज्ञानीति व्यपदेशमेकत्वप्रकारेण कुरुते । तथान्यत्रापि । यत्र द्रव्यस्य भेदेन व्यपदेशोऽस्ति तत्र पृथक्त्व, यत्राभेदेन तत्रैकत्वमिति ॥ ४७ ॥

पुधत्त एयत्त चावि पृथक्त्वमेकत्व चापि । के भणति । तच्चण्हू तत्त्वज्ञा इति । तद्यथा-भिन्नास्तित्वनिर्वृत्त भिन्नास्तित्वनिर्वृत्तस्य पुरुषस्य भिन्नव्यपदेश भिन्नव्यपदेशस्य भिन्नसंस्थान भिन्नसंस्थानस्य भिन्नसंख्य भिन्नसंख्यस्य भिन्नविषयलब्धवृत्तिक भिन्नविषयलब्धवृत्तिकस्य धन कर्तृ पृथक्त्वप्रकारेण धनीति व्यपदेश करोति यथा तथैव चाभिन्नास्तित्वनिर्वृत्त ज्ञानमभिन्नास्तित्वनिर्वृत्तस्य पुरुषस्य अभिन्नव्यपदेशमभिन्नव्यपदेशस्य अभिन्नसंस्थानमभिन्नसंस्थानस्य अभिन्नसंख्यमभिन्नसंख्यस्य अभिन्नविषयलब्धवृत्तिकमभिन्नविषयलब्धवृत्तिकस्य ज्ञान कर्तृ पुरुषस्यापृथक्त्वप्रकारेण ज्ञानीति व्यपदेश करोति । दृष्टान्तव्याख्यान गत तथान्यत्र दार्ष्टान्तपक्षेऽपि यत्र विवक्षित द्रव्यस्य भेदेन व्यपदेशादयो भवति तत्र निश्चयेन भेदो ज्ञातव्य पूर्वगाथाकथितक्रमेण देवदत्तस्य गवादि । यत्र पुनरपि व्यपदेशादयो भवति तत्र निश्चयेनाभेदो ज्ञातव्य वृक्षस्य शाखा जीवस्य दर्शनज्ञानादयो गुणा इत्यादि वदिति । अत्र सूत्र यदेव जीवेन सहाभिन्नव्यपदेश अभि

और आत्माको प्रदेशभेदरहित एकता है । परन्तु गुणगुणीके कथनकी अपेक्षा ज्ञान गुणके द्वारा आत्मा 'ज्ञानी' ऐसा नाम धारण करता है [तथा] वैसे ही [द्विविधाभ्या] इन दो प्रकारके भेदाभेदकथनद्वारा [तत्त्वज्ञा] वस्तुस्वरूपके जाननेवाले पुरुष हैं वे [पृथक्त्व] प्रदेशभेदकी पृथक्तासे जो सबध है उसको पृथक्त्व कहते हैं [च] और [अपि] निश्चयसे [एकत्व] प्रदेशोंकी एकतासे सबध है उसका नाम एकत्व है ऐसे दो भेदोंको [भणन्ति] कहते हैं । भावार्थ—व्यवहार दो प्रकारका है एक पृथक्त्व और एक एकत्व जहांपर भिन्न द्रव्योंमें एकताका सबध दिखाया जाय उसका नाम पृथक्त्व व्यवहार कहा जाता है और एक वस्तुमें भेद दिखाया जाय उसका नाम एकत्व व्यवहार कहा जाता है सो ये दोनों प्रकारका सबध धन धनी ज्ञान ज्ञानीमें व्यपदेशादिक चार प्रकारसे दिखाया जाता है । धन जो है सो अपना नाम सस्थान सख्या और विषय इन चारों भेदोंसे जुदा है—और पुरुष अपना नाम सस्थान सख्या विषयरूप चार भेदोंसे जुदा है । परंतु धनके सबधसे पुरुष धनी कहलाता है इसीको पृथक्त्व व्यवहार कहा जाता है । ज्ञान और ज्ञानीमें एकता है

---

१ दृश्यम् ।

द्रव्यज्ञानयोरर्थान्तरत्वे दोषोऽयम्,—

णाणी णाणं च सदा अत्थंतरिदो दु अण्णमण्णस्स।
दोण्हं अचेदणत्तं पसजदि सम्मं जिणावमदं ॥ ४८ ॥

ज्ञानी ज्ञानं च सदार्थान्तरिते त्वन्योऽन्यस्य।
द्वयोरचेतनत्वं प्रसजति सम्यग् जिनावमतम् ॥ ४८ ॥

ज्ञानी ज्ञानाद्यद्यर्थान्तरभूतस्तदा स्वकरणांशमन्तरेण परशुरहितदेवदत्तवत्करणव्यापारा-

[illegible] अभिन्नप्रदेशत्वेन च [illegible] सम्यग्ज्ञानभावना [illegible] बीजभूत [illegible] [illegible] ॥ ४७ ॥ अथ ज्ञानज्ञानिनोरत्यन्तभेदे दोषं [illegible] —णाणी ज्ञानी जीवः णाणं च ज्ञानं च सदा ज्ञानगुणोऽपि सदा अत्थंतरिदो दु [illegible] अण्णमण्णस्स अन्योन्यापेक्षया [illegible] दोण्हं अचेदणत्तं द्वयोरचेतनत्वं पसजदि प्रसजति प्राप्नोति। [illegible] सम्मं जिणावमदं सम्यक्प्रकारेण जिनानामसम्मतमिति। तथाहि। [illegible] गुणो [illegible] गुणी [illegible] प्रसङ्गात् [illegible]

परंतु नाम लक्षण संख्या विषयोंसे ज्ञानका भेद किया जाता है। वस्तुस्वरूपको भली भाँति जाननेके कारण उस ज्ञानके संबंधसे ज्ञानी नाम पाता है इसको एकत्व व्यवहार कहते हैं। ये दो प्रकारके संबंध समस्त द्रव्योंमें चार प्रकारसे जानना ॥४७॥ आगे ज्ञान और ज्ञानीमें सर्वथाप्रकार जो भेद ही माना जाय तो बड़ा दोष आता है, ऐसा कथन करते हैं,—[ज्ञानी] आत्मा [च] और [ज्ञान] चैतन्यगुणका [सदा] सदाकाल [अर्थान्तरिते] सर्वथा प्रकारभेद होय [तु अन्योन्यस्य] तो परस्पर [द्वयो] ज्ञानी और ज्ञानके [अचेतनत्व] जड़भाव [प्रसजति] होता है [सम्यक्] यथार्थमें यह [जिनावमत] जिनेन्द्र भगवानका कथन है। भावार्थ—जैसे अग्निमें उष्णता गुण है जो इस अग्नि और उष्णतागुणमें पृथक्ता होती तो इंधनको जला नहीं सकती थी जो प्रथमसे ही उष्णगुण जुदा होता तो काहेसे जलाता ? और जो अग्नि जुदी होती तो उष्णगुण किसके आश्रय रहे ? निराश्रय होकर

समर्थत्वादचेतयमानोऽचेतन एव स्यात् । ज्ञानं यदि ज्ञानिनोऽर्थांतरभूतं तदा तत्कंर्शमंतरेण देवदत्तरहितपरशुवत्तत्कर्तृत्वव्यापारासमर्थत्वादचेतयमानमचेतनमेव स्यात् । न च ज्ञानज्ञानिनोर्युतसिद्धयोस्संयोगेन चेतनत्वं द्रव्यस्य निर्विशेषस्य गुणानां निराश्रयाणां शून्यत्वादिति ॥ ४८ ॥

श्रयेन जडो भवति । अथ मतं यथा भिन्नदात्रोपकरणेन देवदत्तो लावको भवति तथा भिन्नज्ञानेन ज्ञानी भवतीति । नैवं वक्तव्यं । छेदनक्रियां प्रति दात्रं बाह्योपकरणं वीर्यांतरायक्षयोपशमजनितं पुरुषस्य शक्तिविशेषस्तत्राभ्यंतरोपकरणं शक्त्यभावे दात्रोपकरणे हस्तव्यापारे च सति छेदनक्रिया नास्ति तथा प्रकाशोपाध्यायादिबहिरंगसहकारिसद्भावे सत्यभ्यंतरज्ञानोपकरणाभावे पुरुषस्य पदार्थपरिच्छित्तिक्रिया न भवतीति । अत्र यस्य ज्ञानस्याभावाज्जीवो जडः सन् वीतरागसहजसुंदरानंदस्यन्दि पारमार्थिकसुखमुपादेयमजानन् संसारे परिभ्रमति तदेव रागादिविकल्प

वह भी जलानेकी क्रियासे रहित हो जावा क्योंकि गुणगुणी परस्पर जुदा होनेपर कार्य करनेको असमर्थ होते हैं । जो दोनोंकी एकता होय वो जलानेकी क्रियामें समर्थ होंय उसीप्रकार ज्ञानी और ज्ञान परस्पर जुदा होनेपर जाननेकी क्रियामें असमर्थता होती है ज्ञानविना ज्ञानी कैसें जाने ? और ज्ञानीविना ज्ञान निराश्रय होवा वो यह भी जाननरूप क्रियामें असमर्थ होता ज्ञानी और ज्ञानके परस्पर जुदा होनेपर दोनों अचेतन होते हैं । और जो कोई यहां यह कहैं कि पृथक्रूप दातसे काटनेपर पुरुष ही काटनहारा कहलाता है इसीप्रकार पृथक्रूप ज्ञानके द्वारा आत्माको जाननेहारा मानो वो इसमें क्या दोष है ? ताका उत्तर—काटनेकी क्रियामें दाव बाह्य निमित्त है उपादान काटनेकी शक्ति पुरुषमें है जो पुरुषमें काटनेकी शक्ति न होती वो दाव कुछ कार्यकारी नहीं होते—इस लिये पुरुषका गुण प्रधान है, उस अपने गुणसे पुरुषके एकता है उसी कारण ज्ञानी और ज्ञानके एक संबंध है पुरुष और दातकासा संबंध नहीं है गुणगुणी वेही कहाते हैं जिनके प्रदेशोंकी एकता होय ज्ञान और ज्ञानीमें संयोगसंबंध

---

१ यथाऽग्निगुणिनः सकाशादत्यंतभिन्नः सन्नुष्णत्वलक्षणगुणोऽग्निदहनक्रियां प्रत्ययसमर्थः सन्निश्चयेन शीतलो भवति । तथा जीवात् गुणिनः सकाशादत्यंतभिन्नो ज्ञानगुणः पदार्थपरिच्छित्तिं प्रत्यसमर्थः सन्निश्चयेन जडो भवति । यथोष्णगुणादत्यन्तभिन्नः सन् वह्निगुणी दहनक्रियां प्रत्यसमर्थः सन्निश्चयेन शीतलो भवति । तथा ज्ञानगुणादत्यन्तभिन्नः सन् जीवो गुणी पदार्थपरिच्छित्तिं प्रत्यसमर्थः सन्निश्चयेन जडो भवति । अथ मतं । यथा भिन्नदात्रोपकरणेन देवदत्तो लावको भवति तथा भिन्नज्ञानेन ज्ञानी भवति इति नैवं वक्तव्यं । छेदनक्रियां प्रति दात्रं बाह्योपकरणं । वीर्यांतरायक्षयोपशमजनितः पुरुषशक्तिविशेषस्त्वभ्यंतरोपकरणं । शक्त्यभावे दात्रोपकरणे हि तद्व्यापारे च सति यथा छेदनक्रिया नास्ति, तथा प्रकाशोपाध्यायादिबहिरंगसहकारिसद्भावे सत्यभ्यंतरज्ञानोपकरणाभावे पुरुषस्य पदार्थपरिच्छित्तिक्रिया न भवतीति ।

अथाज्ञानिनो ह्यज्ञानसमवायो निष्फलः । ज्ञानित्वं तु ज्ञानसमवायाभावात् नास्त्येव । ततोऽज्ञानीति वचनमज्ञानेन सहैकत्वमवश्यं साधयत्येव । सिद्धे चैवमज्ञानेन सहैकत्वे ज्ञानेनाऽपि सहैकत्वमवश्यं सिद्ध्यतीति ॥ ४९ ॥

समवायस्य पदार्थांतरत्वनिरासोऽयम्,—

समवत्ती समवाओ अपुधब्भूदो य अजुदसिद्धो य ।
तम्हा दव्वगुणाणं अजुदा सिद्धित्ति णिद्दिट्ठा ॥ ५० ॥

समवर्तित्वं समवायः अपृथग्भूतत्वमयुतसिद्धत्वं च ।
तस्माद्द्रव्यगुणानां अयुता सिद्धिरिति निर्दिष्टा ॥ ५० ॥

कारणेनाज्ञानित्वं पूर्वमेव तिष्ठति अथवा स्वभावेनाज्ञानित्वं तथैव ज्ञानित्वमपि स्वभावेनैव गुणत्वादिति । अत्र यथा मेघपटलावृते दिनकरे पूर्वमेव प्रकाशस्तिष्ठति पश्चात्पटलविघटनानुसारेण प्रकटो भवति तथा जीवे निश्चयनयेन क्रमकरणव्यवधानरहितत्रैलोक्योदरविवरवर्तिसमस्तवस्तुगतानंतधर्मप्रकाशकमखण्डप्रतिभासमयं केवलज्ञानं पूर्वमेव तिष्ठति किंतु व्यवहारनयेनानादिकर्मावृतः सन्न ज्ञायते पश्चात्कर्मपटलविघटनानुसारेण प्रकटं भवति न च जीवाद्बहिर्भूतं ज्ञानं तिष्ठतीति पश्चात्समवायसंबंधबलेन जीवे संबद्धं न भवतीति भावार्थः ॥ ४९ ॥ अथ गुणगु

अज्ञानी था तो यह अज्ञानी था अज्ञानके संबंधसे कुछ प्रयोजन नहीं है स्वभावसे ही अज्ञानी भये है इसकारण यह बात सिद्ध हुई कि—ज्ञान गुणका जो प्रदेशभेदरहित ज्ञानीमें एकभाव माना जाय तो आत्माके अज्ञानगुणसे एकभाव होता सता अज्ञानीपद धरता है—इसकारण ज्ञान और ज्ञानीमें अनादिही अनंत एकता है । ऐसी एकता है जो ज्ञानके अभावसे ज्ञानीका अभाव हो जाता है—और ज्ञानीके अभावमें ज्ञानका अभाव होता है । और जो यों नहीं माना जाय तो आत्मा अज्ञानभावकी एकतासे अवश्यमेव अज्ञानी होता है और जो ऐसा कहा जाता है कि अज्ञानका नाश करके आत्मा ज्ञानी होता है सो यह कथन कर्म उपाधि संबंधसे व्यवहारनयकी अपेक्षा जानना । जैसें सूर्य मेघपटलद्वारा आच्छादित हुवा प्रभारहित कहा जाता है परंतु सूर्य अपने स्वभावसे उस प्रभासें त्रिकाल जुदा होता नहीं पटलकी उपाधिसे प्रभास हीन अधिक कहा जाता है तैसें ही यह आत्मा अनादि पुद्गलउपाधिसंबंधसे अज्ञानी हुवा प्रवर्ते है परंतु यह आत्मा अपने स्वाभाविक अनंत केवलज्ञान स्वभावसे स्वरूपसे किसी कालमें भी जुदा नहीं होता । कर्मोंकी उपाधिसे ज्ञानकी हीनता अधिकता कहा जाती है इसप्रकार निश्चय करके ज्ञानीसे ज्ञानगुण जुदा नहीं है । कर्मसंबंधके वशसे अज्ञानी कहा जाता है कर्मके घटनेसे ज्ञानी होता है यह कथन व्यवहारनयकी भेद ॥ जानना ॥ ४९ ॥ आगें गुणगुणीमें एकभावके विना

---

१ [illegible]

द्रव्यगुणानामेकास्तित्वनिर्वृत्तत्वादनादिरनिधना सहवृत्तिर्हि समवर्तित्वम् । स एव समवायो जैनानाम् । तदेव संज्ञादिभ्यो भेदेऽपि वस्तुत्वेनाभेदादपृथग्भूतत्वम् । तदेव युतसिद्धिनिबन्धनस्यास्तित्वान्तरस्याभावादयुतसिद्धत्वम् । ततो द्रव्यगुणानां समवर्तित्वलक्षणसमवायभाजामयुतसिद्धिरेव, न पृथग्भूतत्वमिति[1] ॥ ५० ॥

णिनो कथंचिदेकत्वं विहायान्य कोपि समवायो नास्तीति समर्थयति;—**समवत्ती** समवृत्ति सहवृत्तिर्गुणगुणिनो कथंचिदेकत्वेनादितादात्म्यसंबंध इत्यर्थ **समवाओ** स एव जैनमते समवायो नान्य कोपि परिकल्पित **अपुधब्भूदो य** तदेव गुणगुणिनो संज्ञालक्षणप्रयोजनादि भेदेपि प्रदेशभेदाभावादपृथग्भूतत्वं भण्यते **अजुदसिद्धा य** तदेव दण्डदण्डिवद्भिन्नप्रदेशलक्षण युतसिद्धत्वाभावादयुतसिद्धत्वं भण्यते **तम्हा** तस्मात्कारणात् **दव्वगुणाण** द्रव्यगुणानां **अजुदा सिद्धित्ति** अयुतासिद्धिरिति कथंचिदभिन्नत्वसिद्धिरिति **णिद्दिट्ठा** निर्दिष्टा कथितेति । अत्र व्याख्याने यथा ज्ञानगुणेन सहानादितादात्म्यसंबंध प्रतिपादितो द्रष्टव्यो जीवेन सह तथैव च मदव्याबाधरूपमप्रमाणमविनश्वरं स्वाभाविक रागादिदोषरहित परमानन्दैकस्वभाव पारमार्थिकसुख तत्प्रभृतयो ये अनंतगुणा केवलज्ञानांतर्भूतास्तैरपि सहानादितादात्म्यसंबंध श्रद्धातव्यो ज्ञातव्य तथैव च समस्तरागादिविकल्पत्यागेन निरंतर ध्यातव्य इत्यभिप्राय ॥५०॥

और किसीप्रकारका संबंध नहीं है ऐसा कथन करते हैं,—[**समवर्तित्व**] द्रव्य और गुणोंके एक अस्तित्वकर अनादि अनंत धारावाहीरूप जो प्रवृत्ति है तिसका नाम जिन मतमें [**समवाय**] समवाय है । **भावार्थ**—संबंध दो प्रकारके हैं एक संयोगसंबंध है और एक समवायसंबंध है—जैसें जीवपुद्गलका संबंध है सो तो संयोगसंबंध है । और समवायसंबंध वहां कहिये जहाँ कि अनेक भावोंका एक अस्तित्व होय सके जैसें गुणगुणीमें संबंध है । गुणोंके नाश होनेसे गुणीका नाश और गुणीके नाश होनेसे गुणोंका नाश होय । इसप्रकार अनेक भावोंका जहां संबंध होय उसीका नाम समवायसंबंध कहा जाता है । [**च अपृथग्भूत**] और वही गुणगुणीका समवायसंबंध प्रदेशभेदरहित जानना । यद्यपि संज्ञा संख्या लक्षण प्रयोजनादिकसे गुणगुणीमें भेद है तथापि जैसें सुवर्णके और पीतादि गुणके समवायसंबंधमें प्रदेशभेद नहीं है, इसीप्रकार गुणगुणीकी एकता है । [**च**] और [**अयुतसिद्धत्व**] वही गुणगुणीका समवाय संबंध मिलकर नहीं हुवा है अनादि सिद्ध एकही है [**तस्मात्**] तिसकारणसे [**द्रव्यगुणानां**] गुणगुणीमें वह समवाय संबंध [**अयुता सिद्धि**] अनादिसिद्धि [**इति**] इसप्रकार [**निर्दिष्टा**] भगवंत देवने दिखाया है ऐसा

---

१ एवं समवायनिरूपणमुख्यत्वेन गाथा ४ गताः ।

दृष्टान्तदार्ष्टान्तिकार्थपुरस्सरो द्रव्यगुणानामनर्थान्तरत्वव्याख्योपसंहारोऽयम्,—

वण्णरसगंधफासा परमाणुपरूविदा विसेसा हि ।
दव्वादो य अणण्णा अण्णत्तपगासगा होंति ॥ ५१ ॥
दंसणणाणाणि तहा जीवणिबद्धाणि णण्णभूदाणि ।
ववदेसदो पुधत्तं कुव्वंति हि णो सभावादो ॥ ५२ ॥ जुम्मं ।

वर्णरसगंधस्पर्शाः परमाणुप्ररूपिता विशेषा हि ।
द्रव्यतश्च अनन्याः अन्यत्वप्रकाशका भवन्ति ॥ ५१ ॥
दर्शनज्ञाने तथा जीवनिबद्धे अनन्यभूते ।
व्यपदेशतः पृथक्त्वं कुरुते हि नो स्वभावात् ॥ ५२ ॥ युग्मम् ।

वर्णरसगंधस्पर्शा हि परमाणो प्ररूप्यंते । ते च परमाणोरविभक्तप्रदेशत्वेनानन्यत्वेऽपि संज्ञादिव्यपदेशनिबंधनैर्विशेषैरन्यत्वं प्रकाशयन्ति । एवं ज्ञानदर्शने अप्यात्मनि

एवं समवायनिराकरणमुख्यत्वेन गाथाद्वयं गतं । अथ दृष्टान्तदार्ष्टान्तरूपेण द्रव्यगुणानां कथंचिद्भेदव्याख्यानोपसंहारः कथ्यते,—वण्णरसगंधफासा वर्णरसगंधस्पर्शाः परमाणुपरूविदा परमाणुद्रव्यप्ररूपिताः कथिताः । कैः कृत्वा । विसेसेहिं विशेषैः संज्ञालक्षणप्रयोजनादिभेदैः अथवा 'विसेसो हि' इति पाठांतरं विशेषाः विशेषगुणधर्माः स्वभावाः हि स्फुटं । ते कथंभूताः । दव्वादो य परमाणुद्रव्याच्च सकाशात् अणण्णा निश्चयनयेनानन्ये अण्णत्तपयासगा होंति पश्चाद्व्यवहारनयेन संज्ञादिभेदेनान्यत्वप्रकाशका भवंति यथा । इति दृष्टांतगाथा गता । दंसणणाणाणि तहा दर्शनज्ञाने द्वे तथा । कथंभूते । जीवणिबद्धाणि जीवनिबद्धे द्वे ।

गुणगुणीविषैं समवायसंबंध जानना ॥ ५० ॥ आगें दृष्टांतसहित गुणगुणीकी एकताका कथन संक्षेपसे करते हैं,—[हि] निश्चयसे [परमाणुप्ररूपिता¹] परमाणुवोंमें कहे जे [वर्णरसगंधस्पर्शा] वर्णरसगंधस्पर्श ऐसे चार [विशेषा] गुण [द्रव्यतः अनन्याः] पुद्गलद्रव्यमें पृथक् नहीं है—भावार्थ—निश्चय नयकी अपेक्षा वर्ण रस गंध स्पर्श ये चार गुण समवायसंबंधसे पुद्गलद्रव्यसे जुदे नहीं है [च] और ये ही चारों वर्णादिकगुण [अन्यत्वप्रकाशका भवन्ति] व्यवहारकी अपेक्षा पुद्गलद्रव्यसे पृथक्ताको भी प्रगट करता है। भावार्थ—यद्यपि ये वर्णादिक गुण निश्चयकरके पुद्गलसे एक हैं तथापि—व्यवहारनयकी अपेक्षा संज्ञा भेदकर भेद भी कहा जाता है प्रदेशभेदसे भेद नहीं है । [तथा] और जैसें पुद्गलद्रव्यसे वर्णादिक गुण अभिन्न हैं तैसें ही निश्चयनयसे [जीवनिबद्धे] जीवमें समवायसंबंधरूप [दर्शनज्ञाने]

---

१ कथिताःप्रज्ञप्ताः ।

ममद्ध आत्मद्रव्यादविभक्तप्रदेशत्वेनाऽनन्येऽपि सञ्ज्ञाव्यपदेशनिबंधैर्विशेषैः पृथक्त्वमा सादयत । स्वभावतस्तु नित्यमपृथक्त्वमेव बिभ्रत ॥ ५१ । ५२ ॥

इति उपयोगगुणव्याख्यान समाप्तं । अथ कर्तृत्वगुणव्याख्यानम् । तत्रादिगाथात्रयेण तदुपोद्घात ।

जीवा अणाइणिहणा सता णता य जीवभावादो ।
सब्भावदो अणता पचग्गगुणप्पधाणा य ॥ ५३ ॥

जीवा अनादिनिधना साता अनताश्च जीवभावात् ।
सद्भावतोऽनता पञ्चाग्रगुणप्रधाना च ॥ ५३ ॥

जीवा हि निश्चयेन परभावानामकरणात् स्वभावाना कर्तारो भविष्यन्ति । तांश्च कुर्वाणा

पुनरपि कथभूते । अणण्णभूदाणि निश्चयनयेन प्रदेशरूपेणानन्यभूते । इत्थभूते त किं कुरुत । ववदसदो पुधत्त व्यपदेशात सज्ञादिभेदत पृथक्त्व नानात्व कुव्वति कुरुत हु स्फुट णो सहावादो नत्र स्वभावतो निश्चयनयेन इति । अस्मिन्नधिकारे यद्यप्यष्टविधज्ञानोपयोगचतुर्विधदर्शनोपयोगव्याख्यानकाले शुद्धाशुद्धविवक्षा न कृता तथापि निश्चयनयेनादिमध्यातविन परमानदमालिनि परमचैतन्यशालिनि भगवत्यात्मनि यदनाकुलत्वलक्षण पारमार्थिकसुख तस्योपादेयभूतस्योपादानकारणभूत यत्केवलज्ञानदर्शनद्वय तदेवोपादेयमिति श्रद्धेय ज्ञेय तथैवार्त्तरौद्रादिसमस्तविकल्पजालत्यागेन ध्येयमिति भावार्थः ॥ ५१ ॥ ५२ ॥ एव दृष्टातदार्ष्टातरूपेण गाथाद्वय गत । अत्र प्रथम 'उवओगो दुवियप्पो' इत्यादि पूर्वोक्तपाठक्रमेण दर्शनज्ञानकथनरूपेणान्तरस्थलपचकेन गाथानवक, तदनतर 'ण वियप्पदि णाणादो' इत्यादि पाठक्रमेण नैयायिक प्रति गुणगुणिभेदनिराकरणरूपेणान्तरस्थलचतुष्टयेन गाथादशकमिति समुदायनैकोनविंशतिगाथाभिर्नवाधिकारस्थ्याख्यानरूपनवाधिकारेषु मध्ये षष्ठ "उपयोगाधिकार समाप्त " । अथानतर वीतरागपरमानन्दसुधारससमरसीभावपरिणतिस्वरूपात् शुद्धजीवास्तिकायात्सकाशात् भिन्न यत्कर्म

दर्शन ज्ञान असाधारण गुण भी [**अनन्यभूते**] जुदे नहीं हैं [**व्यपदेशात**] सज्ञादि भेदके कथनसे आधार आत्मा और ज्ञानदर्शनमें [**पृथक्त्व**] भेदभावको [**कुरुते**] करते हैं यद्यपि [**हि**] निश्चयसे [**स्वभावात्**] निजस्वरूपसे [**नो**] भेद संभवता नहीं है । भगवतका मत अनेकात है दोय नयोंसे सधता है इस कारण निश्चय व्यवहारसे भेद अभेद गुणगुणीका स्वरूप परमागमसे विशेषरूप जानना । यह चारप्रकार दर्शनोपयोग आठ प्रकार ज्ञानोपयोग शुद्धअशुद्ध भेद कथनसे सामान्यस्वरूप पूर्वोक्त प्रकारसे जानना यह उपयोग गुणका व्याख्यान पूर्ण हुवा ॥ ५१ । ५२ ॥

आगें कर्तृत्वका अधिकार कहते हैं जिसमेंसे जीव निश्चयनयसे परभावनके कर्त्ता नहीं हैं अपने स्वभावके ही कर्त्ता होते हैं । वे ही जीव अपने परिणामोंको करते हुये अनादि अनंत हैं कि सादिसात हैं अथवा सादिअनंत हैं और कैसे

निधनानि भावान्तराणि नोपपद्यत इति वक्तव्यम् । ते खल्वनादिकर्ममलीमसाः पङ्कसंपृक्ततोयवत्तदाकारेण परिणतत्वात्पञ्चप्रधानगुणप्रधानत्वेनैवानुभूयन्त इति ॥ ५३ ॥

जीवस्य भाववशात्सादिसनिधनत्वे साद्यनिधनत्वे च विरोधपरिहारोऽयम्,—

एव सदो विणासो असदो जीवस्स होइ उप्पादो ।
इदि जिणवरेहिं भणिदं अण्णोण्णविरुद्धमविरुद्धं ॥ ५४ ॥

एवं सतो विनाशोऽसतो जीवस्य भवत्युत्पादः ।
इति जिनवरैर्भणितमन्योऽन्यविरुद्धमविरुद्धम् ॥ ५४ ॥

एवं हि पञ्चभिर्भावैः स्वयं परिणममानस्यास्य जीवस्य कदाचिदौदयिकेनैकेन मनुष्य-

---

सादित्वादतोऽपि निधनं भविष्यतीत्याशङ्कनीयं । स हि कर्मक्षये सति क्षायिकभावः केवलज्ञानादिरूपेण समुत्पद्यमानः सिद्धभाव इव जीवस्य सद्भाव एव । स च स्वभावस्य विनाशो नास्ति चेति अनाद्यनिधनसहजशुद्धपारिणामिकभावानां सादि सनिधनान्यौदयिकादिभावान्तराणि कथं संभवन्तीति चेत् पञ्चाग्रगुणप्रधाना य यद्यपि स्वभावेन शुद्धास्तथापि व्यवहारेणानादिकर्मबन्धवशात्सकर्दमजलवदौदयिकादिभावपरिणता दृश्यत इति स्वरूपव्याख्यानं गतं । इदानीं संख्यां कथयति । सब्भावदो अणंता द्रव्यस्वभावगणनया पुनरनन्ता । सान्तानन्तशब्दयोर्द्वितीयव्याख्यानं क्रियते—महतेन संसारविनाशे वर्तते सान्ता भव्या न विद्यते संसारविनाशो येषां ते पुनरनन्ता अभव्यास्ते चाभव्या अनन्तसंख्यास्तेभ्योऽपि भव्या अनन्तगुणसंख्यास्तेभ्योऽपि अभव्यसमानभव्या अनन्तगुणा इति । अत्र सूत्रे अनादिनिधना अनन्तज्ञानादिगुणाधारा शुद्धजीवा एव सादिसनिधनमिथ्यात्वरागादिदोषपरिहारपरिणतानां भव्यानामुपादेया इति तात्पर्यार्थः ॥५३॥ अथ यद्यपि पर्यायार्थिकनयेन विनाशोत्पादौ भवतः तथापि द्रव्यार्थिकनयेन न भवत इति पूर्वापरविरोधो नास्तीति कथयति;—**एव सदो विणासो** एवं पूर्वगाथाकथितप्रकारेणौदयिकभावे

उत्तर—अनादि कर्मसंबंधसे यह आत्मा अशुद्धभावसे परिणमै है इस कारण सादि सांत सादिअनंतभाव होता है जैसे कीचसे मिला हुआ जल अशुद्ध होता है उस कीचके मिलाप होने न होनेकर शुद्ध अशुद्ध जल कहा जाता है तैसें ही इस आत्माके कर्म संबंध होने न होनेके कारण सादिसांत सादिअनंत भाव कहे जाते हैं [च] और [पञ्चाग्रगुणप्रधानाः] औदयिक, औपशमिक, क्षायोपशमिक क्षायिक, और परिणामिक इन पांच भावोंकी प्रधानतालिये प्रवर्ते हैं ॥ ५३ ॥ आगें जीवोंके पांच भावोंसे यद्यपि सादिसांत अनादि अनंत भाव हैं तथापि द्रव्यार्थिक पर्यायार्थिक नयसे विरोध नहीं है ऐसा कथन करते हैं,—[एवं] इस पूर्वोक्त प्रकारके भावोंसे परिणये जो जीव हैं

---

१ कर्मसंश्लिष्टजलवत् यद्यपि स्वभावेन विशुद्धास्तथापि व्यवहारेणानादिकर्मबन्धवशात्सकर्दमजलवत् दयिकादिभावपरिणता इत्यर्थः ।

त्वादिलक्षणेन भावेन सतो विनाशस्तथा परेणौदयिकेनैव देवत्वादिलक्षणेन भावेन असत उत्पादो भवत्येव । एतच्च 'न सतो विनाशो नासत उत्पाद' इति पूर्वोक्तसूत्रेण सह विरुद्धमपि न विरुद्धम् । यतो जीवस्य द्रव्यार्थिकनयादेशेन न सत्प्रणाशो नासदुत्पाद । तस्यैव पर्य्यायार्थिकनयादेशेन सत्प्रणाशो सदुत्पादश्च । न चैतदनुपपन्नम् । नित्ये जले कल्लोलानामनित्यत्वदर्शनादिति ॥ ५४ ॥

जीवस्य सदसद्भावोच्छित्त्युत्पत्तिनिमित्तोपाधिप्रतिपादनमेतत्,–

णेरइयतिरियमणुआ देवा इदि णामसञ्जुदा पयडी ।
कुव्वंति सदो णास असदो भावस्स उप्पाद ॥ ५५ ॥

नारकतिर्यङ्मनुष्या देवा इति नामसंयुता प्रकृतय ।
कुर्वन्ति सतो नाशमसतो भावस्योत्पाद ॥ ५५ ॥

नायुरुच्छेदवशात् मनुष्यपर्यायरूपेण सतो विद्यमानस्य विनाशो भवति **असदो जीवस्स हवदि उप्पादो** असतोऽविद्यमानस्य देवादिजीवस्य पर्यायस्य गतिनामकर्मोदयाद्भवत्युत्पाद **इदि जिणवरेहि भणिय** इति जिनवरैर्वीतरागसर्वज्ञैर्भणित इदं तु व्याख्यान । कथभूत । **अण्णोण्णविरुद्धमविरुद्ध** अन्योन्यविरुद्धमप्यविरुद्ध । कथमिति चेत् । द्रव्यपीठिकायां सतो जीवस्य विनाशो नास्त्यसत उत्पादो नास्तीति भणित, अत्र सतो जीवस्य विनाशो भवत्यसत उत्पादो भवतीति भणित तेन कारणेन विरोध । तत्र । तत्र द्रव्यपीठिकायां द्रव्यार्थिकनयेनोत्पादव्ययौ निषिद्धौ, अत्र तु पर्यायार्थिकनयेनोत्पादव्ययौ भवत इति नास्ति विरोध । तदपि कस्मादिति चेत्[1] द्रव्यार्थिकपर्यायार्थिकनययो परस्परसापेक्षत्वादिति । अत्र यद्यपि पर्यायार्थिकनयेन सादिसनिधन जीवद्रव्य व्याख्यात तथापि शुद्धनिश्चयेन यदेवानादिनिधन टङ्कोत्कीर्णज्ञायकैकस्वभाव निर्विकार सदानन्दैकस्वरूप च तदेवोपादेयमित्यभिप्राय ॥ ५४ ॥ अथ पूर्वसूत्रे जीवस्योत्पादव्ययसत्त्व

उनके जब उत्पादव्ययकी अपेक्षा कीजे तब [**सत**] विद्यमान जो मनुष्यादिकपर्याय उसका तो [**विनाश**] विनाश होना और [**असत**] अविद्यमान [**जीवस्य**] जीवकी [**उत्पाद**] देवादिकपर्यायकी उत्पत्ति [**भवति**] होती है [**इति जिनवरैः**] इस प्रकार जिनेंद्र भगवानकेद्वारा [**अन्योऽन्यविरुद्ध**] यद्यपि परस्परविरुद्ध है तथापि [**अविरुद्ध**] विरोधरहित [**भणित**] कहा गया है । **भावार्थ—** भगवानके मतमें दो नय हैं एक द्रव्यार्थिक नय—दूसरा पर्यायार्थिक नय है । द्रव्यार्थिक नयसे वस्तुका न तो उत्पाद है और न नाश है । और पर्यायार्थिक नयसे नाश भी है और उत्पाद भी है । जैसे कि जल नित्य अनित्यस्वरूप है द्रव्यकी अपेक्षा तो जल नित्य है—और कल्लोलोंकी अपेक्षा उपजना विनशना होनेके कारण अनित्य है इसी प्रकार द्रव्य नित्यअनित्यस्वरूप कथंचित्प्रकारसे जान लेना ॥ ५४ ॥ आगे जीवके

---

[1] अनित्य नय म नय ।

यथा हि जलराशेर्जलराशित्वेनासदुत्पादं सदुच्छेदं चाननुभवतश्चतुर्भ्यः ककुब्विभागेभ्यः क्रमेण वहमानाः पवमानाः कल्लोलानामसदुत्पादं सदुच्छेदं च कुर्वन्ति । तथा जीवस्याऽपि जीवत्वेन सदुच्छेदमसदुत्पत्तिं चाननुभवतः क्रमेणोदीयमानाः नारकतिर्यङ्मनुष्यदेवनामप्रकृतयः सदुच्छेदमसदुत्पादं च कुर्वंतीति ॥ ५५ ॥

जीवस्य भावोदयवर्णनमेतत्,—

उदयेण उवसमेण य खयेण दुहिं मिस्सिदेहिं परिणामे ।
जुत्ता ते जीवगुणा बहुसु य अत्थेसु विच्छिण्णा ॥ ५६ ॥

उदयेनोपशमेन च क्षयेण च द्वाभ्यां मिश्रिताभ्यां परिणामेन ।
युक्तास्ते जीवगुणा बहुषु चार्थेषु विस्तीर्णाः ॥ ५६ ॥

षड्गुणितं तस्य नरनारकादिगतिनामकर्मोदयकारणमिति कथयति—णिरइयतिरियमणुआ देवा इदि णामसंजुदा नारकतिर्यग्मनुष्यदेवा इति नामसंयुक्ताः पयडी नामकर्मप्रकृतयः कर्तृ कुव्वंति कुर्वन्ति । किं । सदो णासं सतो विद्यमानस्य भावस्य पर्यायस्य नाशं असदो भावस्स उप्पत्ती असतो भावस्य पर्यायस्योत्पत्तिमिति । तथाहि । यथा समुद्रस्य समुद्ररूपेणाविनश्वरस्यापि कल्लोला उत्पादव्ययद्वयं कुर्वंति तथा जीवस्य सहजानन्दैकस्वभावेनाविनश्वरस्यापि व्यवहारेणानादिकर्मोदयवशाज्जातिनामकर्मोदयेन युक्तस्य नरकगत्यादिकर्मप्रकृतयः उत्पादव्ययं च कुर्वंतीति । तथा चोक्तं । "अनादिनिधने द्रव्ये स्वपर्यायाः प्रतिक्षणम् । उन्मज्जन्ति निमज्जन्ति जलकल्लोलवज्जले ॥" अत्र यदेव शुद्धनिश्चयनयेन मुक्तात्मस्वरूपं रागादिरहितं वीतरागपरमाह्लादैकरूपचैतन्यप्रकाशसहितं शुद्धजीवास्तिकायस्वरूपं तदेवोपादेयमिति भावार्थः ॥ ५५ ॥ एवं कर्मकर्तृत्वाभिप्रायपीठिकाव्याख्यानरूपेण गाथाचतुष्टयं प्रथमस्थलं गतं । अथ पीठिकायां पूर्वं जीवस्य यदौदयिकादिभावपंचकं सूचितं तस्य व्याख्यानं करोति;—जुत्ता इत्यादि ।

उत्पादव्ययका कारण कर्मउपाधि दिखाते हैं;—[नारकतिर्यङ्मनुष्या देवाः] नरक तिर्यञ्च मनुष्य देव [इति नामसंयुताः] इन नामोंकर संयुक्त [प्रकृतयः] नामकर्मसम्बन्धिनी प्रकृतियें [सतः] विद्यमानपर्यायके [नाशं] विनाशको [कुर्वन्ति] करती हैं । और [असतः] अविद्यमान [भावस्य] पर्यायकी [उत्पादं] उत्पत्तिको [कुर्वन्ति] करती हैं । भावार्थ—जैसे समुद्र अपने जलसमूहसे उत्पाद व्ययअवस्थाको प्राप्त नहीं होता अपने स्वरूपसे थिर है परंतु चारों ही दिशाओंकी पवन आनेसे कल्लोलोंका उत्पादव्यय होता रहता है तैसे ही जीवद्रव्य अपने स्वभावोंसे उपजता विनशता नहीं है सदा टंकोत्कीर्ण है परंतु वस ही जीवके अनादिकर्मोपाधिके वशसे [illegible] उत्पादव्ययभाव करता है ॥ ५५ ॥ आगे जीवके [illegible] करते हैं—[ये] जो भाव [उदयेन] कर्म-

तत उदयादिसंजातानामात्मनो भावानां निमित्तमात्रभूततथाविधावस्थत्वेन स्वयं परिणमनाद्द्रव्यकमापि व्यवहारनयेनात्मनो भावानां कर्तृत्वमापद्यत इति ॥ ५८ ॥

जीवभावस्य कर्मकर्तृत्वे पूर्वपक्षोऽयम्,—

भावो जदि कम्मकदो अत्ता कम्मस्स होदि किध कत्ता ।
ण कुणदि अत्ता किंचि वि मुत्ता अण्णं सगं भावं ॥ ५९ ॥

भावो यदि कर्मकृत आत्मा कर्मणो भवति कथं कर्ता ।
न करोत्यात्मा किंचिदपि मुक्त्वान्यं स्वकं भावं ॥ ५९ ॥

यदि खल्वौदयिकादिरूपो जीवस्य भावः कर्मणा क्रियते तदा जीवस्तस्य कर्ता न

योसौ क्षायिको भावः स एव सर्वप्रकारेणोपादेयभूत इति मनसा श्रद्धेयं ज्ञेयं मिथ्यात्वरागादिविकल्पजालत्यागेन निरंतरं ध्येयमिति भावार्थः ॥ ५८ ॥ इति तेषामेव भावानामनुपचरितासद्भूतव्यवहारेण कर्म कर्ता भवतीति व्याख्यानमुख्यत्वेन गाथा गता । एवं निश्चयेन रागादिभावानां जीवः कर्ता पूर्वगाथायां भणितमत्र तु व्यवहारेण कर्म कर्तृ भवतीति स्वतंत्रगाथाद्वयं गतं । अथ जीवस्यैकांतेन कर्मकर्तृत्वे दूषणद्वारेण पूर्वपक्षं करोति;—**भावो जदि कम्मकदो** भावो यदि कर्मकृत: पर्येकांतेन रागादिभावः कर्मकृतो भवति ***आदा कम्मस्स होदि किह कत्ता*** तदात्मा द्रव्यकर्मणः कथं कर्ता भवति यतः कारणाद्रागादिपरिणामाभावे सति द्रव्यकर्म नोत्पद्यते । तदपि कथमितिचेत् । **ण कुणदि अत्ता किंचिवि** न करोत्यात्मा किमपि । किं कृत्वा । **मुत्ता अण्णं सगं भावं** स्वकीयचैतन्यभावं मुक्त्वा पत् द्रव्यकर्मादिकं न करोतीत्यात्मन सर्वथाप्यकर्तृत्वदूषणद्वारेण पूर्वपक्षेऽत्र द्वितीयगाथायां परिहारं इत्येकं व्याख्यानं तावत् द्वितीय

इसकारण इन चारों अवस्थाओंका निमित्त पाकर आत्मा परिणमता है व्यवहारनयसे इन चारों भावोंका कर्त्ता द्रव्यकर्म जानना, निश्चयनयसे आत्मा कर्त्ता जानना ॥ ५८ ॥ आगें सर्वथा प्रकारसे जो जीवभावोंका कर्त्ता द्रव्यकर्म कहा जाय तो दूषण है ऐसा कथन किया जाता है,—[यदि] जो सर्वथा प्रकार [भावः] भावकर्म [कर्मकृतः] द्रव्यकर्मके द्वारा किया होय तो [आत्मा] जीव [कर्मणः] भावकर्मका [कथं] कैसें [कर्त्ता] करनेहारा [भवति] होता है। भावार्थ—जो सर्वथा द्रव्यकर्मको औदयिकादि भावोंका कर्त्ता कहा जाय तो आत्मा अकर्त्ता होकर संसारका अभाव होय और जो कहा जाय कि आत्मा द्रव्यकर्मका कर्त्ता है इस कारण संसारका अभाव नहीं है सो द्रव्यकर्म पुद्गलका परिणाम है उसको आत्मा कैसें करैगा ? क्योंकि [आत्मा] आत्मद्रव्य जो है सो [स्वकं भावं] अपने भावकर्मको [मुक्त्वा] छोडकर [अन्यत्] अन्य [किंचित् अपि] कुछ भी परद्रव्यसंबंधी भावका [न करोति] नहीं करता है। भावार्थ—सिद्धान्तमें कार्यकी उत्प

भवति । न च जीवस्याकर्तृत्वमिष्यते । तत पारिशेष्येण द्रव्यकर्मण कर्त्ताऽऽपद्यते । तत्तु कथं । यतो निश्चयनयेनात्मा स्वभावमुज्झित्वा नान्यत्किमपि करोतीति ॥ ५९ ॥

पूर्वसूत्रोदितपूर्वपक्षसिद्धान्तोऽयम्,—

भावो कम्मणिमित्तो कम्मं पुण भावकारणं हवदि ।
ण दु तेसिं खलु कत्ता ण विणा भूदा दु कत्तारं ॥ ६० ॥

भावः कर्मनिमित्तः कर्म पुनर्भावकारणं भवति ।
न तु तेषां खलु कर्ता न विना भूतास्तु कर्तारं ॥ ६० ॥

व्याख्यानं पुनरत्रैव पूर्वपक्षोत्तरं परिहारो द्वितीयगाथायां स्थितपक्ष एव । कथमिति चेत् । पूर्वोक्तप्रकारेणात्मा कर्मणां कर्ता न भवतीति दूषणे दत्ते सति सांख्यमतानुसारिशिष्यो वदति । "अकर्ता निर्गुणः शुद्धो नित्यः सर्वगतोऽक्रियः । अमूर्तश्चेतनो भोक्ता जीवः कपिलशासने ॥" इति वचनादस्माकं मते आत्मनः कर्माकर्तृत्वं भूषणमेव न दूषणं । अत्र परिहारः । यथा शुद्धनिश्चयेन रागाद्यकर्तृत्वमात्मनः तथा यद्यशुद्धनिश्चयेनाप्यकर्तृत्वं भवति तदा द्रव्यकर्मबन्धाभावः तदभावे संसाराभावः संसाराभावे सर्वदैव मुक्तप्रसंगः स च प्रत्यक्षविरोध इत्यभिप्रायः ॥५९॥ एवं प्रथमव्याख्याने पूर्वपक्षद्वारेण द्वितीयव्याख्याने पुनः पूर्वपक्षपरिहारद्वारेण गाथा गता । अथ पूर्वसूत्रे आत्मनः कर्माकर्तृत्वे सति दूषणरूपेण पूर्वपक्षस्तस्य परिहारं ददाति द्वितीयव्या

लिये दो कारण कहे हैं । एक 'उपादान' और एक 'निमित्त' । द्रव्यकी शक्तिका नाम उपादान है सहकारी कारणका नाम निमित्त है । जैसें घटकार्यकी उत्पत्तिकेलिये मृत्तिकाकी शक्ति तो उपादान कारण है और कुंभकार दंडचक्रादि निमित्त कारण हैं । इससे निश्चय करकें मृत्तिका (मट्टी) घटकार्यकी कर्त्ता है व्यवहारसे कुंभकार कर्त्ता है क्योंकि निश्चय करकें तो कुंभकार अपने चेतनमयी घटाकार परिणामोंका ही कर्त्ता है व्यवहारसे कुंभकार घटके परिणामोंका कर्त्ता है जहां उपादानकारण है, वहां निश्चय नय है और जहां निमित्तकारण है वहां व्यवहार नय है । और जो यों कहा जाय कि चेतनात्मक घटाकार परिणामोंका कर्त्ता सर्वथा प्रकार निश्चय नयकर घट ही है कुंभकार नहीं है तो अचेतन घट चेतनात्मक घटाकार परिणामोंका कर्त्ता कैसें होय ? चेतनद्रव्य अचेतन परिणामोंका कर्त्ता होय अचेतनद्रव्य चेतनपरिणामोंका कर्त्ता नहीं होता । तैसें ही आत्मा और कर्मोंमें उपादान निमित्तका कथन जानना । इस कारण [illegible] जो यह प्रश्न किया था कि जो सर्वथा प्रकार [illegible] ही भावकर्मोंका कर्त्ता माना जाय तो आत्मा अकर्त्ता होता है [illegible] होता ? इस [illegible] आत्माके भावकर्म [illegible] दश [illegible] संसार होता [illegible] आत्मा [illegible] और परिणामोंका कर्त्ता आत्मा [illegible]

व्यवहारेण निमित्तमात्रत्वाज्जीवभावस्य कर्म कर्तृ, कर्मणोऽपि जीवभावः कर्ता। निश्चयेन तु न जीवभावाना कर्म कर्तृ,न कर्मणो जीवभावः। न च ते¹ कर्तारमन्तरेण सम्भूते। यतो निश्चयेन जीवपरिणामाना जीवः कर्ता, कर्मपरिणामाना कर्म कर्तृ इति ॥ ६० ॥

कुव्वं सगं सहावं अत्ता कत्ता सगस्स भावस्स।
ण हि पोग्गलकम्माणं इदि जिणवयणं मुणेयव्वं ॥ ६१ ॥

व्याख्यानपक्षे स्थितपक्ष दर्शयति,—भावो निर्मलचिज्ज्योति स्वभावाच्छुद्धजीवास्तिकायात्प्रतिपक्षभूतो भावो मिथ्यात्वरागादिपरिणाम । स च किंविशिष्ट । **कम्मणिमित्त** कर्मोन्यरहितचैतन्यचमत्कारमात्रात्परमात्मस्वभावात्प्रतिपक्षभूत यदुदयागत कर्म तन्निमित्त यस्य स भवति कर्मनिमित्त **कम्म पुण** ज्ञानावरणादिकर्मरहिताच्छुद्धात्मतत्त्वाद्विलक्षण यद्भावि द्रव्यकर्म पुन । तत्कथभूत। **भावकारण हवदि** निर्विकारशुद्धात्मोपलब्धिभावात्प्रतिपक्षभूतो योसौ रागादिभाव स कारण यस्य तद्भावकारण भवति **ण दु** नैव **तु पुन तेसि** तयोर्जीवगतरागादिभावद्रव्यकर्मणो । किं नैव । **कत्ता** परस्परोपादानकर्तृत्व **खलु** स्फुट **ण विणा** नैव विना **भूदा दु** भूते भवाते तु पुनस्ते द्रव्यभावकर्मणी द्वे। क विना। **कत्तार** उपादानकर्तार विना किंतु जीवगतरागादिभावाना जीव एवोपादानकर्ता द्रव्यकर्मणा कर्मवर्गणायोग्यपुद्गल एवेति । द्वितीयव्याख्याने तु यद्यपि जीवस्य शुद्धनयेनाकर्तृत्व तथापि विचार्यमाणमशुद्धनयेन कर्तृत्व स्थितमिति भावार्थ ॥ ६० ॥ एव पूर्वगाथाया प्रथमव्याख्यानपक्षे तत्र पूर्वपक्षोत्र पुनरुत्तरमिति गाथाद्वय गत।

उत्तर कहा जाता है,—**[भाव]** औदयिकादि भाव **[कर्मनिमित्त]** कर्मके निमित्त पाकर होते हैं **[पुन.]** फिर **[कर्म]** ज्ञानावरणादिक द्रव्यकर्म जो है सो **[भावकारण]** औदयिकादि भावकर्मोंका निमित्त **[भवति]** होता है। **[तु]** और **[तेषां]** तिन द्रव्यकर्म भावकर्मोंका **[खलु]** निश्चय करके **[कर्त्ता न]** आपसमें द्रव्य कर्त्ता नहीं है न पुद्गल भावकर्मका कर्त्ता है और न जीव द्रव्यकर्मका कर्त्ता है **[तु]** और वे द्रव्यकर्म भावकर्म **[कर्त्तारं विना]** कर्त्ताके विना **[नैव]** निश्चय करके नहीं **[भूता]** हुये हैं अर्थात्। वे द्रव्यभावकर्म कर्त्ता विना भी नहीं हुये। **भावार्थ**—निश्चय नयसे जीवद्रव्य अपने चिदात्मक भावकर्मोंका कर्त्ता है और पुद्गलद्रव्य भी निश्चयकरके अपने द्रव्यकर्मका कर्त्ता है व्यवहारनयकी अपेक्षा जीव द्रव्यकर्मके विभाव भावके कर्त्ता हैं। और द्रव्यकर्म जीवके विभावभावोंके कर्त्ता हैं इस प्रकार उपादान निमित्त कारणके भेदसे जीवकर्मका कर्तृत्व निश्चय व्यवहार नयोंकर आगम प्रमाणसे जान लेना। शिष्यने जो पूर्व गाथामें प्रश्न किया था गुरुने इसप्रकार उसका समाधान किया है ॥ ६० ॥ आगे फिर भी दृढ कथनके निमित्त

¹ भावकर्मणी अत्र द्विवचनम्।

कुर्वन् स्वकं स्वभावं आत्मा कर्ता स्वकस्य भावस्य ।
न हि पुद्गलकर्मणामिति जिनवचनं ज्ञातव्यम् ॥ ६१ ॥

निश्चयेन जीवस्य स्वभावानां कर्तृत्वं पुद्गलकर्मणामकर्तृत्वं चागमेनोपदर्शितमत्र इति ॥ ६१ ॥

अथ निश्चयेनाभिन्नकारकत्वात् कर्मणो जीवस्य च स्वयं स्वरूपकर्तृत्वमुक्तम्;—

कम्मं पि सगं कुव्वदि सेण सहावेण सम्ममप्पाणं ।
जीवो वि य तारिसओ कम्मसहावेण भावेण ॥ ६२ ॥

कर्मापि स्वकं करोति स्वेन स्वभावेन सम्यगात्मानं ।
जीवोऽपि च तादृशकः कर्मस्वभावेन भावेन ॥ ६२ ॥

कर्म खलु कर्मत्वप्रवर्तमानपुद्गलस्कंधरूपेण कर्तृतामनुबिभ्राण कर्मत्वगमनशक्तिरूपेण

अथ तदेव व्याख्यानमागमसंवादेन दृढयति;—कुव्वं कुर्वाणः । कं । सगं सहावं स्वकं स्वभावं चिद्रूपं । अत्र यद्यपि शुद्धनिश्चयेन केवलज्ञानादिशुद्धभावाः स्वभावा भण्यते तथापि कर्मकर्तृत्वप्रस्तावादशुद्धनिश्चयेन रागादयोऽपि स्वभावा भण्यते तान् कुर्वन् सन् अत्ता कत्ता सगस्स भावस्स आत्मा कर्ता स्वकीयभावस्य ण हि पोग्गलकम्माणं नैव पुद्गलकर्मणां हु स्फुटं निश्चयनयेन कर्ता इदि जिणवयणं मुणेदव्वं इति जिनवचनं मन्तव्यं ज्ञातव्यमिति । अत्र यद्यप्यशुद्धभावानां कर्तृत्वं स्थापितं तथापि ते हेयास्तद्विपरीता अनन्तसुखादिशुद्धभावा उपादेया इति भावार्थः ॥ ६१ ॥ इत्यागमसंवादरूपेण गाथा गता । अथ निश्चयनाभेदषट्कारकरूपेण कर्मपुद्गलः स्वकीयस्वरूपं करोति जीवोऽपि तथैवेति प्रतिपादयति,—कम्ममपि सयं कर्मकर्तृ स्वयमपि स्वयमेव कुव्वदि करोति । किं करोति । सम्ममप्पाणं सम्यग्यथा भवत्यात्मानं द्रव्यकर्मस्वभावं । केन कारणभूतेन । सगेण भावेण स्वकीयस्वभावेनाभेदषट्कारकी-

---

आगमप्रमाण दिखाते हैं कि निश्चयकरके जीवद्रव्य अपने भावकर्मोंका ही कर्त्ता है पुद्गलकर्मोंका कर्त्ता नहीं है,—[स्वकं] आत्मीय [स्वभावं] परिणामको [कुर्वन्] करता हुवा [आत्मा] जीवद्रव्य [स्वकस्य] अपने [भावस्य] परिणामोंका [कर्त्ता] करनहारा होता है । [पुद्गलकर्मणां] पुद्गलमयी द्रव्यकर्मोंका कर्ता [हि] निश्चयकरके [न] नहीं है [इति] इस प्रकार [जिनवचनं] जिनेंद्रभगवानकी वाणी [ज्ञातव्यं] जाननी । **भावार्थ**—आत्मा निश्चयकरके अपने भावोंका कर्ता है परद्रव्यका कर्ता नहीं है ॥ ६१ ॥ आगे निश्चयनयसे उपादान-कारणकी अपेक्षा कर्म अपने स्वरूपका कर्ता है ऐसा कथन करते हैं—[कर्म] कर्मरूप परिणये पुद्गलस्कंध [अपि] निश्चयसे [स्वेन स्वभावेन] अपने स्वभावसे [सम्यक्] यथार्थ जिसप्रकार है तैसा [स्वकं] अपने [आत्मानं] स्वरूपको

१ पक्षा

कम्मं कम्मं कुव्वदि जदि सो अप्पा करेदि अप्पाणं ।
किध तस्स फलं भुंजदि अप्पा कम्मं च देदि फलं ॥ ६३ ॥

कर्म कर्म करोति यदि स आत्मा करोत्यात्मानं ।
कथं तस्य फलं भुङ्क्ते आत्मा कर्म च ददाति फलं ॥ ६३ ॥

कर्मजीवयोरन्योन्याकर्तृत्वेऽन्यदत्तफलान्योपभोगलक्षणदूषणपुरःसरः पूर्वपक्षोऽयम् ॥६३॥

अथ सिद्धान्तसूत्राणि,—

ओगाढगाढणिचिदो पोग्गलकायेहिं सव्वदो लोगो ।
सुहमेहिं बादरेहिं य णंताणंतेहिं विविहेहिं ॥ ६४ ॥

णाभेदषट्कारकीस्वभावेन परिणममानं शुद्धमात्मानं करोतीति ॥ ६२ ॥ एवमागमसंवादरूपेणाभेदषट्कारकीरूपेण च स्वतन्त्रगाथाद्वयं गतं । इति समुदायेन गाथाषट्केन तृतीयान्तरस्थलं समाप्तं । अथ पूर्वोक्तप्रकारेणाभेदषट्कारकीव्याख्याने कृते सति निश्चयनयेनेदं व्याख्यानं कृतमिति नयविभागमजानन्सन् गृहीत्वा शिष्यः पूर्वपक्षं करोति,—कम्मं कर्म कर्तृ **कम्मं कुव्वदि जदि** यद्यस्तेन जीवपरिणामनिरपेक्षं सद्द्रव्यकर्म करोति 'जदि' **सो अप्पा करेदि अप्पाणं** यदि च स आत्मात्मानमेव करोति न च द्रव्यकर्म **किध तस्स फलं भुंजदि** कथमेतस्मादकृतकर्मणः फलं भुङ्क्ते । स कः । **अप्पा** आत्मा कर्ता **कम्मं च देदि फलं** जीवेनाकृतं कर्म च कर्तृ कथमात्मने ददाति फलं न कथमपीति ॥ ६३ ॥ चतुर्थस्थले

और न कर्म जीवका कर्ता है ॥६२॥ आगें कर्म और जीवका अन्य कोई कर्ता है और इनको अन्य जीवद्रव्य फल देता है ऐसा जो दूषण है उसकेलिये शिष्य प्रश्न करता है, **[यदि]** जो **[कर्म]** ज्ञानावरणादि आठ प्रकारका कर्मसमूह है सो **[कर्म]** अपने परिणामको **[करोति]** करता है और जो **[स]** वह संसारी **[आत्मा]** जीवद्रव्य **[आत्मानं]** अपने स्वरूपको **[करोति]** करता है **[तदा]** तब **[तस्य]** उस कर्मका **[फलं]** उदय अवस्थाको प्राप्त हुवा जो फल तिसको **[आत्मा]** जीवद्रव्य **[कथं]** किस प्रकार **[भुङ्क्ते]** भोगता है ? **[च]** और **[कर्म]** ज्ञानावरणादि आठ प्रकारका कर्म **[फलं]** अपने विपाकको **[कथं]** कैसे] **[ददाति]** देता है । **भावार्थ**—जो कर्म अपने कर्म स्वरूपका कर्ता है और आत्मा अपने स्वरूपका कर्ता है तो आत्मा जडस्वरूप कर्मका कैसें भोगवैगा और कर्म चैतन्यस्वरूप आत्माको फल कैसें देगा निश्चयनयकी अपेक्षा किसीप्रकार न तो कोई कर्म भोगता है और न भुक्तावे है, ऐसा शिष्यने प्रश्न किया तिसका गुरु समाधान करते हैं कि—आप है, जब आत्मा रागी द्वेषी होकर अनादि अविद्यासे परिणमता है तब परस्परसंबंधी सुख दुःख भाव करता है और कर्म फल देता है ऐसा कहते हैं ॥६३॥ आगें शिष्यने जो यह

अवगाढगाढनिचितः पुद्गलकायैः सर्वतो लोकः ।
सूक्ष्मैर्बादरैश्चानन्तानन्तैर्विविधैः ॥ ६४ ॥

कर्मयोग्यपुद्गला अञ्जनचूर्णपूर्णसमुद्गकन्यायेन सर्वलोकव्यापित्वाद्यत्रात्मा तत्रानानीता एवावतिष्ठन्त इत्यत्रोक्तम् ॥ ६४ ॥

अन्याकृतकर्मसमुत्पत्तिप्रकारोक्तिरियम्,—

अत्ता कुणदि सहावं तत्थ गदा पोग्गला सभावेहिं ।
गच्छंति कम्मभावं अण्णोण्णागाहमवगाढा ॥ ६५ ॥

पूर्वपक्षद्वारेण गाथा गता । अथ परिहारमुख्यत्वेन गाथासप्तकं । तत्र गाथासु सप्तसु मध्ये पुद्गलस्य स्वयमुपादानकर्तृत्वमुख्यत्वेन "ओगाढगाढ" इत्यादिपाठक्रमेण गाथात्रयं, तदनंतरं कर्तृत्वभोक्तृत्वव्याख्यानोपसंहारमुख्यत्वेन च "जीवा पोग्गलकाया" इत्यादि गाथाद्वयं, तदनंतरं बन्धमुख्यत्वेन मोक्षमुख्यत्वेन च "एवं कत्ता भोत्ता" इत्यादि गाथाद्वयं । एवं समुदायेन परिहारगाथासूत्राणि सप्त । तद्यथा । यथा शुद्धनिश्चयेन शक्तिरूपेण केवलज्ञानाद्यनंतगुणपरिणतैः सूक्ष्मजीवैर्निरंतरं लोको भृतस्तिष्ठति तथा पुद्गलैरपीति निरूपयति;—**ओगाढगाढणिचिदो** अवगाढगाढनिचितः यथा पृथ्वीकायिकादिपंचविधसूक्ष्मस्थावरैरंजनचूर्णपूर्णसमुद्गकन्यायेनावगाढगाढरूपेण नैरंतर्येण निचितो भृतः । कोसौ । **लोगो** लोकः **पोग्गलकायेहिं** तथा पुद्गलकायैश्च । पुनः । **सव्वदो** सर्वप्रदेशेषु । कथंभूतैः पुद्गलकायैः । **सुहुमेहिं बादरेहिं य** सूक्ष्मैर्दृष्ट्यगोचरैर्बादरैर्दृष्टिविषयैश्च । कतिसंख्योपेतैः । **अणंताणंतेहिं** अनंतानंतैः । किंविशिष्टैः । **विविहेहिं** विविधैरंतर्भेदेन बहुभेदैरिति । अत्र कर्मवर्गणायोग्यपुद्गला यत्रात्मा तिष्ठति तत्रानानीता एव पूर्वं तिष्ठंति बंधकाले पश्चादागमिष्यंतीति । यद्यपि पूर्वं ते तत्रात्मावगाढगाढक्षेत्रे क्षीरनीरन्यायेन तिष्ठंति तथापि ते हेयास्तेभ्यो भिन्नः शुद्धबुद्धैकस्वभावः परमात्मा स एवोपादेय इति भावार्थः ॥ ६४ ॥ अथात्मनो मिथ्यात्वरागादिपरिणामे सति कर्मवर्गणायोग्यपुद्गला निश्चये

प्रश्न किया है उसका विशेष कथन किया जाता है सो पहिले यह कहते हैं कि कर्मयोग्य पुद्गल समस्त लोकमें भरपूर होकर तिष्ठ हुये हैं,—[लोकः] समस्त त्रैलोक्य [सर्वतः] सब जगहँ [पुद्गलकायैः] पुद्गलस्कंधोंके द्वारा [अवगाढगाढनिचितः] अतिशय भरपूर गाढा भराहुवा है । जैसें कज्जलकी कज्जलदानी अंजनसे भरी होती है उसी प्रकार सर्वत्र पुद्गलोंसे लोक भरपूर तिष्ठता है कैसे हैं पुद्गल? [सूक्ष्मैः] अतिशय सूक्ष्म हैं [च] तथा [बादरैः] अतिशय बादर हैं । फिर कैसे हैं पुद्गल? [अनंतानंतैः] अपरिमाणसंख्या लियेहुये हैं । फिर कैसे हैं पुद्गल? [विविधैः] नाना प्रकारके कर्मवर्गणादि भेद आदि अनेक प्रकारके हैं ॥ ६४ ॥ आगे कहते हैं कि आत्मा कर्मोंकी जाति

[illegible]

आत्मा करोति स्वभावं तत्र गताः पुद्गलाः स्वभावैः ।
गच्छन्ति कर्मभावमन्योन्यावगाहावगाढाः ॥ ६५ ॥

आत्मा हि संसारावस्थायां पारिणामिकचैतन्यस्वभावमपरित्यजन्नेवानादिबन्धनबद्धत्वादनादिमोहरागद्वेषस्निग्धैरविशुद्धैरेव भावैर्विवर्तते । स खलु यत्र यदा मोहरूपं, रागरूपं वा स्वस्य भावमारभते, तत्र तदा तमेव निमित्तीकृत्य जीवप्रदेशेषु परस्परावगाहेनानुप्रविष्टाः स्वभावैरेव पुद्गलाः कर्मभावमापद्यत इति ॥ ६५ ॥

नोपादानरूपेण स्वयमेव कर्मत्वेन परिणमन्तीति प्रतिपादयति,—अत्ता आत्मा कुणदि करोति । कं करोति । सहावं स्वभावं रागद्वेषमोहसहितं परिणामं । ननु रागद्वेषमोहरहितो निर्मलचिज्ज्योतिःसहितश्च वीतरागानन्दरूपः स्वभावपरिणामो भण्यते रागादिविभावपरिणाम कथं स्वभावशब्देनाभ्यत इति पारिहारमाह—बन्धप्रकरणवशादशुद्धनिश्चयेन रागादिविभावपरिणामोऽपि स्वभावो भण्यते इति नास्ति दोषः । तत्थ गदा तत्रामशरीरावगाढक्षेत्रे गताः स्थिताः । के ते । पोग्गला कर्मवर्गणायोग्यपुद्गलस्कन्धाः गच्छंति कम्मभावं गच्छन्ति परिणमन्ति कर्मपर्यायं द्रव्यकर्मपर्याय । कैः करणभूतैः । सहावेहिं निश्चयेन स्वकीयोपादानकारणैः । कथं गच्छन्ति । अण्णोण्णागाह अन्योन्यावगाहसंबंधो यथा भवति । कथंभूताः सन्तः । अवगाढा क्षीरनीरन्यायेन संश्लिष्टा इत्यभिप्रायः ॥ ६५ ॥ अथ कर्मवर्गणायोग्यपुद्गला यथा

नहीं है जब रागादि भावोंसे आत्मा परिणमता है तब पुद्गलका बंध होता है,—[आत्मा] जीव [स्वभावं] अशुद्ध रागादि विभाव परिणामोंको [करोति] करता है [तत्र गताः पुद्गलाः] जहां जीवद्रव्य तिष्ठता है तहां वर्गणारूप पुद्गल तिष्ठते हैं वे [स्वभावैः] अपने परिणामोंके द्वारा [कर्मभावं] ज्ञानावरणादि अष्टकर्मरूप भावको [गच्छन्ति] प्राप्त होते हैं । कैसे हैं वे पुद्गल ? [अन्योन्यावगाहावगाढाः] परस्पर एक क्षेत्र अवगाहना करके अतिशय गाढ भर रहे हैं ।
भावार्थ—यह आत्मा संसार अवस्थामें अनादि कालसे लेकर परद्रव्यके संबंधसे अशुद्ध चेतनात्मक भावोंसे परिणमता है वही आत्मा जब मोहरागद्वेषरूप अपने विभाव भावोंसे परिणमता है, तब इन भावोंका निमित्त पाकर पुद्गल अपनी ही उपादान शक्तिसे अष्टप्रकार कर्मभावोंसे परिणमता है—तत्पश्चात् जीवके प्रदेशोंमें परस्पर एक क्षेत्रावगाहनारूप बंधते हैं इससे यह बात सिद्ध हुई कि पूर्वबद्ध द्रव्यकर्मोंका निमित्त पाकर जीव अपनी अशुद्ध चेतनाशक्तिद्वारा रागादि भावोंका कर्ता होता है तब [illegible] भावोंका निमित्त पाकर अपनी शक्तिसे अष्टप्रकार कर्मोंका कर्ता होता है [illegible] निमित्त मात्र कर्ता है उपादान कर्ता अपना है । ६५ । आगे कर्मोंकी

अनन्यकृतत्वं कर्मणां वैचित्र्यस्यात्रोक्तम्,—

जह पुग्गलदव्वाणं बहुप्पयारेहिं खधणिव्वत्ती ।
अकदा परेहिं दिट्ठा तह कम्माणं वियाणाहि ॥ ६६ ॥

यथा पुद्गलद्रव्याणां बहुप्रकारैः स्कन्धनिर्वृत्तिः ।
अकृता परैर्दृष्टा तथा कर्मणां विजानीहि ॥ ६६ ॥

यथा हि स्वयोग्यचन्द्रार्कप्रभोपलम्भे सन्ध्याभ्रेन्द्रचापपरिवेषप्रभृतिभिर्बहुभिः प्रकारैः पुद्गलस्कन्धविकल्पाः कर्त्रंतरनिरपेक्षा एवोत्पद्यन्ते । तथा स्वयोग्यजीवपरिणामोपलम्भे ज्ञानावरणप्रभृतिभिर्बहुभिः[1] प्रकारैः कर्माण्यपि कर्त्रंतरनिरपेक्षाण्येवोत्पद्यन्ते इति ॥ ६६ ॥

निश्चयेन जीवकर्मणोश्चैककर्तृत्वेऽपि व्यवहारेण कर्मदत्तफलोपलम्भो जीवस्य न विरुध्यत इत्यत्रोक्तम्,—

जीवा पुग्गलकाया अण्णोण्णागाढगहणपडिबद्धा ।
काले विजुज्जमाणा सुहदुक्खं दिंति भुंजंति ॥ ६७ ॥

स्वयमेव कर्मत्वेन परिणमन्ति तथा दृष्टान्तमाह,—**जह पोग्गलदव्वाणं बहुप्पयारेहिं खदणिप्पत्ती अकदा परेहिं दिट्ठा** यथा पुद्गलद्रव्याणां बहुप्रकारैः स्कन्दनिष्पत्तिरकृता परैर्दृष्टा **तह कम्माणं वियाणाहि** तथा कर्मणामपि विजानीहि हे शिष्य त्वमिति । तथाहि । यथा चन्द्रार्कप्रभोपलम्भे सति अभ्रसन्ध्यारागेन्द्रचापपरिवेषादिभिर्बहुभिः प्रकारैः परेणाकृता अपि स्वयमेव पुद्गलाः परिणमन्ति लोके तथा विशुद्धज्ञानदर्शनस्वभावात्मतत्त्वसम्यक्श्रद्धानज्ञानानुचरणभावनारूपाभेदरत्नत्रयात्मककारणसमयसाररहितानां जीवानां मिथ्यात्वरागादिपरिणामे सति कर्मवर्गणायोग्यपुद्गला जीवेनोपादानकारणभूतेनाकृता अपि स्वकीयोपादानकारणैः कृत्वा ज्ञानावरणादिमूलोत्तरप्रकृतिरूपैर्बहुभेदैः परिणमन्ति इति भावार्थः ॥ ६६ ॥ एवं पुद्गलस्य स्वयमुपादानकर्तृत्वव्याख्यानमुख्यत्वेन गाथात्रयं गतं । अथाहृतकर्मणः कथं फलं भुक्तं जीव

विचित्रताके उपादानकारणसे अन्यद्रव्य कर्त्ता नहीं है पुद्गलही है ऐसा कथन करते हैं,-[**यथा**] जैसें [[**पुद्गलद्रव्याणां**] पुद्गलद्रव्योंके [**बहुप्रकारैः**] नानाप्रकारके भेदासे [**स्कंधनिर्वृत्तिः**] स्कंधोंकी परणति [**दृष्टा**] देखी जाती है कैसी है स्कंधोंकी परणति ? [**परैः**] अन्यद्रव्योंके द्वारा [**अकृता**] नहीं कियीहुई अपनी शक्तिसे उत्पन्नहुई है [**तथा**] तैसें ही [**कर्मणां**] कर्मोंकी विचित्रता [**विजानीहि**] जानो । **भावार्थ**—जैसें चद्रमा वा सूर्यकी प्रभाका निमित्त पाकर सन्ध्याके समय आकाशमें अनेक वर्ण, बादल, इंद्रधनुष, मंडलादिक नाना प्रकारके पुद्गलस्कंध अन्यकर्ता विना किये ही अपनी शक्तिसे अनेक प्रकार होकर परिणमते हैं, तैसें ही जीवद्रव्यके अशुद्ध चेतनात्मक भावोंका निमित्त पाकर पुद्गलवर्गणायें अपनी ही शक्तिसे ज्ञानावरणादि आठ प्रकार कर्मदशारूप होकर परिणमती हैं ॥ ६६ ॥ आगें निश्चयनयकी अपेक्षा यद्यपि जीव और पुद्गल अपने भावोंके कर्त्ता हैं तथापि व्यवहारसे कर्मद्वारा

---

१ ज बहुभिः[illegible] । २ उपादानकारण निज[illegible]

जीवाः पुद्गलकायाः अन्योन्यावगाढग्रहणप्रतिबद्धाः ।
काले वियुज्यमानाः सुखदुःखं ददति भुञ्जन्ति ॥ ६७ ॥

जीवा हि मोहरागद्वेषस्निग्धत्वात्पुद्गलस्कन्धाश्च स्वभावस्निग्धत्वाद्बन्धावस्थायां परमाणुद्वन्द्वानीवान्योन्यावगाढग्रहणप्रतिबद्धत्वेनावतिष्ठन्ते । यदा तु ते परस्परं वियुज्यन्ते, तदोदितप्रच्यवमाना निश्चयेन सुखदुःखरूपात्मपरिणामानां व्यवहारेणेष्टानिष्टविषयाणां निमित्तमात्रत्वात्पुद्गलकायाः सुखदुःखरूपं फलं प्रयच्छन्ति । जीवाश्च निश्चयेन निमित्तमात्रभूतद्रव्यकर्मनिर्वर्तितसुखदुःखस्वरूपात्मपरिणामानां व्यवहारेण द्रव्यकर्मो-

---

इति योगा द्रव्यरूपं कर्म परस्परभोक्तृत्वविषये नयविभागेन युक्तं दर्शयति,—जीवा पोग्गलकाया जीवकायाः पुद्गलकायाश्च । कथंभूताः । अण्णोण्णागाढगहणपडिबद्धा अन्योन्यावगाढग्रहणप्रतिबद्धाः स्वकीयस्वकीयरागादिस्निग्धरूक्षादिपरिणामनिमित्तेन पूर्वमेवान्योन्यावगाहेन संश्लिष्टरूपेण प्रतिबद्धास्तत्र तिष्ठन्ति तावत् काले विजुज्जमाणा उदयकाले स्वकीयफलं दत्वा वियुज्यमाना निर्जरां गच्छन्तः । किं कुर्वन्ति । दिति निर्विकारचिदानन्दैकस्वभावजीवस्य मिथ्यात्वरागादिभिः सहैकत्वरुचिरूपं मिथ्यात्वं तैरेव सहैकत्वप्रतिपत्तिरूपं मिथ्याज्ञानं तदेवैकत्व-परिणतिरूपं मिथ्याचारित्रमिति मिथ्यात्वादित्रयपरिणतजीवानां पुद्गलाः कर्तारो ददति प्रयच्छन्ति । किं ददति । सुहदुक्खं अनाकुलत्वलक्षणपारमार्थिकसुखाद्विपरीतं परमाकुलत्वोत्पादकमभ्यन्तरे निश्चयेन हर्षविषादरूपं व्यवहारेण पुनर्बहिर्विषये विविधेष्टानिष्टेन्द्रियविषयप्राप्तिरूपं कटुकविपर-

---

दिये हुये सुखदुःखके फलको जीव भोगता है यह कथन भी विरोधी नहीं है ऐसा कहते हैं,— [जीवा] जीवद्रव्य हैं वे [पुद्गलकायाः] पुद्गलवर्गणाके पुञ्ज [अन्योऽन्यावगाढग्रहणप्रतिबद्धाः] परस्पर अनादि कालसे लेकर अत्यंत सघन मिलापसे बंध अवस्थाको प्राप्त हुए हैं । वे ही जीव पुद्गल [काले] उदयकाल अवस्थामें [वियुज्यमानाः] अपना रस देकर खिरते हैं तब [सुखदुःखं] साता असाता [ददति] देते हैं और [भुञ्जन्ति] भोगते हैं । भावार्थ—जीव जो हैं वे पूर्वबंधसे मोहराग द्वेषरूप भावोंसे स्निग्धरूप हैं और पुद्गल अपने स्वभावसे ही स्निग्धरूक्षपरिणामोंद्वारा प्रवर्तता है । आगमप्रमाणमें गुण अंशकर जैसी कुछ बंधअवस्था कही गई है, उस ही प्रकार अनादिकालसे लेकर आपसमें बंध रहे हैं । और जब फलकाल आता है तब पुद्गल कर्मवर्गणायें जीवके जो बंधरहीं हैं वे सुखदुःखरूप होतीं हैं निश्चयकर आत्माके परिणामोंको निमित्त मात्र सहाय है व्यवहारकर शुभअशुभ जो बाह्यपदार्थ हैं उनको भी कर्म निमित्त कारण हैं सुखदुःखफलको देते हैं । और जीव जो हैं वे अपने

दयापादितेणनिष्टविषयाणां भोक्तृत्वात्तथाविध फल भुङ्क्ते इति । एवं जीवस्य भोक्तृत्वगुणोऽपि व्याख्यातः ॥ ६७ ॥

कर्तृत्वभोक्तृत्वव्याख्योपसंहारोऽयम्,—

तम्हा कम्मं कत्ता भावेण हि संजुदोध जीवस्स ।
भोत्ता हु हवदि जीवो चेदगभावेण कम्मफलं ॥ ६८ ॥

तस्मात्कर्म कर्तृ भावेन हि संयुतमथ जीवस्य ।
भोक्ता तु भवति जीवश्चेतकभावेन कर्मफलम् ॥ ६८ ॥

तत एतत् स्थितं निश्चयेनात्मनः कर्म कर्तृ, व्यवहारेण जीवभावस्य । जीवोऽपि निश्चयेनात्मभावस्य कर्ता व्यवहारेण कर्मण इति । यथात्रोभयनयाभ्यां कर्म कर्तृ, तथैकेनापि नयेन न भोक्तृ । कुतः चैतन्यपूर्वकानुभूतिसद्भावाभावात् । ततश्चेतनत्वात्केवल

साक्षाद्स्वभाव सांसारिकसुखदुःखं भुजति वीतरागपरमाह्लादैकरूपसुखामृतरसास्वादमोचन रहिता जीवा निश्चयेन भावरूपं व्यवहारेण द्रव्यरूपं भुजते सेवन्त इत्यभिप्रायः ॥ ६७ ॥ एवं भोक्तृत्वव्याख्यानमुख्यत्वेन गाथा गता । अथ कर्तृत्वभोक्तृत्वोपसंहारः कथ्यते;—**तम्हा** यस्मात्पूर्वोक्तनयविभागेन जीवकर्मणोः परस्परोपादानकर्तृत्वं नास्ति तस्मात्कारणात् **कम्म कत्ता** कर्म कर्तृ भवति । केषां । निश्चयेन स्वकीयभावानां व्यवहारेण रागादिजीवभावानां जीवोपि व्यवहारेण द्रव्यकर्मभावानां निश्चयेन स्वकीयचेतकभावानां । कथंभूतं सत्कर्म स्वकीयभावानां कर्तृ भवति । **संजुदा** संयुक्तं **अध** अथो । केन संयुक्तं । **भावेण** मिथ्यात्वरागादिभावेन परिणामेन **जीवस्स** जीवस्य जीवोपि कर्मभावेन संयुक्त इति **भोत्ता दु** भोक्ता पुनः **हवदि** भवति । कोसौ । **जीवो** निर्विकारचिदानंदैकानुभूतिरहितो जीवः । केन कृत्वा । **चेदग**

निश्चयकर तो सुखदु खरूप परिणामोंके भोक्ता हैं और व्यवहार कर द्रव्यकर्मके उदयसे प्राप्त हुये जो शुभअशुभ पदार्थ तिनको भोगवे हैं । जीवमें भोगनेका गुण है कर्ममें यह गुण नहीं है क्योंकि कर्म जड है जडमें अनुभवनशक्ति नहीं है ॥ ६७ ॥ आगे कर्तृत्व भोक्तृत्वका व्याख्यान संक्षेपमात्र कहा जाता है,—**[तस्मात्]** तिस कारणसे **[हि]** निश्चयकरके **[कर्म]** द्रव्यकर्म जो है सो **[कर्ता]** अपने परिणामोंका कर्त्ता है। कैसा है द्रव्यकर्म ? **[जीवस्य]** आत्मद्रव्यका **[भावेन]** अशुद्ध चेतनात्मपरिणामोंकर **[संयुत]** संयुक्त है। भावार्थ–द्रव्यकर्म अपने ज्ञानावरणादिक परिणामोंका उपादानरूप कर्त्ता है और आत्माके अशुद्ध चेतनात्मक परिणामोंको निमित्त मात्र है । इस कारण व्यवहारकर जीव भावोंका भी कर्त्ता कहा जाता है **[अथ]** फिर इसी प्रकार जीवद्रव्य अपने अशुद्ध चेतनात्मक भावोंका उपादानरूप

१ स्वकीयस्य ।

येन समुच्छिन्नसम्यग्ज्ञानज्योति कर्तृत्वभोक्तृत्वाधिकार परिसमाप्य सम्यक्प्रकटितप्रभुत्वशक्तिर्ज्ञानस्यैवानुमार्गेण चरति, तदा विशुद्धात्मतत्वोपलम्भनरूपमपवर्गनगर विगाहत इति ॥ ७० ॥

अथ जीवविकल्पा उच्यते,—

एको चेव महप्पा सो दुवियप्पो त्तिलक्खणो होदि ।
चदु चकमणो भणिदो पचग्गगुणप्पधाणो य ॥ ७१ ॥
छक्कापक्कमजुत्तो उवउत्तो सत्तभङ्गसब्भावो ।
अट्ठासओ णवत्थो जीवो दसट्ठाणगो भणिदो ॥ ७२ ॥ जुम्म ।

एक एव महात्मा स द्विविकल्पस्त्रिलक्षणो भवति ।
चतुश्चक्रमणो भणित पञ्चाग्रगुणप्रधानश्च ॥ ७१ ॥

गच्छति । कि । णिव्वाणपुर अव्याबाधसुखाद्यनतगुणास्पद शुद्धात्मोपलम्भलक्षण निर्वाणनगर । पुनरपि किविशिष्ट स भव्य । धीरो धीर घोरोपसर्गपरीषहकालेपि निश्चयरत्नत्रयलक्षणसमाधेरच्युत पाण्डवादिवदिति भावार्थ ॥ ७० ॥ इति कर्मरहितत्वव्याख्यानेन द्वितीयगाथा गता । एव 'ओगाढगाढ" इत्यादि पूर्वोक्तपाठक्रमेण परिहारगाथासप्तक गत । इति जीवास्तिकायव्याख्यानरूपेषु प्रभुत्वादिनवाधिकारेषु मध्ये पचभिरतरस्थलै समुदायेन "जीवा अणाइणिहणा" इत्याद्यष्टादशगाथाभि कर्तृत्वभोक्तृत्वकर्मसयुक्तत्वत्रयस्य यौगपद्यव्याख्यान समाप्त । अथ तस्यैव नवाधिकारकथितजीवास्तिकायस्य पुनरपि दशविकल्पैर्विंशतिविकल्पैर्वा विशेषव्याख्यान करोति,—एक्को चेव महप्पा सर्वसुवर्णसाधारणेन षोडशवर्णिकगुणेन यथा सुवर्णराशिरेक तथा सर्वजीवसाधारणकेवलज्ञानाद्यनतगुणसमूहेन शुद्धजीवजातिरूपेण सग्रहनयेनैकश्चैव महात्मा अथवा उवजुत्तो सर्वजीवसाधारणलक्षणेन केवलज्ञानदर्शनोपयोगेनोपयुक्तत्वात्परिणतत्वादेक । कश्चिदाह । यथैकोपि चद्रमा बहुषु जलघटेषु भिन्नभिन्नरूपो दृश्यते तथैकोपि

प्रत्यक्ष ज्ञानमार्गमें प्रवर्त्तता है । भावार्थ—जो जीव काललब्धि पाकर अनादि अविद्याको विनाशकरकें यथार्थ पदार्थोंकी प्रतीतिमें प्रवर्ते है प्रगट भेदविज्ञान ज्योतिकर कर्तृत्वभोक्तृत्वरूप अधकारको विनाशकर आत्मीकशक्तिरूप अनतस्वाधीन धर्म्से स्वरूपमें प्रवर्ते है सो जीव अपने शुद्धस्वरूपको प्राप्त होकर मोक्ष अवस्थाको पाता है ॥७०॥ आगें जीवद्रव्यके भेद कहते हैं,—[स जीव] यह जीवद्रव्य [महात्मा] अविनाशी चैतन्य उपयोगसयुक्त है इस कारण [एक एव] सामान्य नयसे एक ही है । जो जो जीव है सो चेतनास्वरूप है इस कारण जीव एक ही कहा जाता है वह ही जीवद्रव्य [द्विविकल्प] ज्ञानोपयोग दर्शनोपयोगके भेदसे दो प्रकार भी कहा

१ निराकुल ।

पट्कापक्रमयुक्त उपयुक्त: सप्तभङ्गसद्भाव ।
अष्टाश्रयो नवार्थो जीवो दशस्थानको भणित ॥ ७२ ॥ युग्मम् ।

स खलु जीवो महात्मा नित्यचैतन्योपयुक्तत्वादेक एव । ज्ञानदर्शनभेदाद्विविकल्प । कर्मफलकार्यज्ञानचेतनाभेदेन लक्ष्यमाणत्वात्त्रिलक्षण । ध्रौव्योत्पादविनाशभेदेन वा चतसृषु गतिषु चङ्क्रमणत्वाच्चतुश्चङ्क्रमण । पञ्चभि पारिणामिकौदयिकादिभिरग्रगुणै प्रधानत्वात् पञ्चाग्रगुणप्रधान । चतसृषु दिक्षूर्ध्वमधश्चेति भवान्तरसङ्क्रमणषट्केनापक्रमेण युक्तत्वात् षट्कापक्रमयुक्त । अस्तिनास्त्यादिभि सप्तभङ्गै सद्भावो यस्येति सप्तभङ्गसद्भाव ।

जीवो बहुशरीरेषु भिन्नभिन्नरूपेण दृश्यत इति । परिहारमाह । बहुषु जलघटेषु चन्द्रकिरणो पाधिवशेन जलपुद्गला एव चन्द्राकारेण परिणता न चाकाशस्थचन्द्रमा । अत्र दृष्टान्तमाह । यथा देवदत्तमुखोपाधिवशेन नानादर्पणाना पुद्गला एव नानामुखाकारेण परिणमन्ति न च देवदत्तमुख नानारूपेण परिणमति यदि परिणमति तदा दर्पणस्थ मुखप्रतिबिंब चैतन्य प्राप्नोति न च तथा तथैकचन्द्रमा अपि नानारूपेण न परिणमतीति । किं च । न चैकब्रह्मनामा कोपि दृश्यते प्रत्यक्षेण यश्चन्द्रवन्नानारूपेण भविष्यति इत्यभिप्राय **सो दुवियप्पो** दर्शनज्ञानभेदद्वयेन संसारिमुक्तद्वयेन भव्याभव्यद्वयेन वा स द्विविकल्प **तिलक्खणो हवदि** ज्ञानकर्मकर्मफल- चेतनात्रयेणोत्पादव्ययध्रौव्यत्रयेण ज्ञानदर्शनचारित्रत्रयेण द्रव्यगुणपर्यायत्रयेण वा त्रिलक्षणो भवति **चदुसंकमो य भणिदो** यद्यपि शुद्धनिश्चयनयेन निर्विकारचिदानन्दैकलक्षणसिद्धगतिस्वभाव- स्तथापि व्यवहारेण मिथ्यात्वरागादिपरिणत सन्नरकादिचतुर्गतिसंक्रमणो भणित **पचग्गगुण प्पहाणो य** यद्यपि निश्चयेन क्षायिकशुद्धपारिणामिकभावद्वयलक्षणस्तथापि सामान्येनौदयिका- दिपञ्चाग्रगुणप्रधानश्च ॥ **छक्कावक्कमजुत्तो** षट्केनापक्रमेण युक्त अस्य वाक्यस्यार्थ कथ्यते- अपगतो विनष्ट विरुद्धक्रम प्राञ्जलत्व यत्र स भवत्यपक्रमो वक्र इति ऊर्ध्वाधोमहादिक्चतुष्टय- गमनरूपेण षड्विधेनापक्रमेण मरणान्ते युक्त इत्यर्थ सा चैवानुश्रेणिगतिरिति **सत्तभंगस ब्भावो** स्यादस्तीत्यादि सप्तभङ्गीसद्भाव **अट्ठासवो** यद्यपि निश्चयेन वीतरागलक्षणनिश्चयस

जाता है । फिर वह ही जीवद्रव्य **[त्रिलक्षणः]** कर्मचेतना कर्मफलचेतना ज्ञान चेतना इन तीन भेदोंकर सयुक्त होनेसे तथा उत्पाद व्यय ध्रौव्य गुण सयुक्त होनेसे तीन प्रकार भी **[भवति]** होता है । फिर वह ही जीवद्रव्य **[चतुश्चक्रमणो भणित.]** चार गतियोंमें परिभ्रमण करता है इस कारण चार प्रकारभी कहा जाता है । फिर वह ही जीव **[पञ्चाग्रगुणप्रधानश्च]** पाच औदयिकादि भावोंकर सयुक्त है इसकारण पाचप्रकारका भी कहा जाता है फिर वह ही जीवद्रव्य **[षट्काप क्रमयुक्त]** छह दिशावोंमें गमनकरनेवाला है चार तो दिशायें और एक ऊपर एक नीचा इन छह दिशाओंके भेदसे छहप्रकारका भी है । फिर वही जीव **[सप्तभङ्गस द्भाव. उपयुक्त]** सप्तभङ्गी वाणीसे साधा जाता है इस कारण सात प्रकारभी

अष्टानां कर्मणां गुणानां वा आश्रयत्वादष्टाश्रयः । नवपदार्थरूपेण वर्तनान्नवार्थः । पृथिव्यप्तेजोवायुवनस्पतिसाधारणप्रत्येकद्वित्रिचतुःपञ्चेन्द्रियरूपेषु दशसु स्थानेषु गतत्वाद्दशस्थानग इति ॥ ७१ ॥ ७२ ॥

पयडिट्ठिदिअणुभागप्पदेसबंधेहिं सव्वदो मुक्को ।
उड्ढं गच्छदि सेसा विदिसावज्जं गदिं जंति ॥ ७३ ॥

प्रकृतिस्थित्यनुभागप्रदेशबंधैः सर्वतो मुक्तः ।
ऊर्ध्वं गच्छति शेषा विदिग्वर्जां गतिं याति ॥ ७३ ॥

म्यनवाद्यष्टगुणाश्रयत्वादष्टाश्रयस्तथापि व्यवहारेण ज्ञानावरणाद्यष्टकर्मास्रव **णवट्ठो** यद्यपि निर्विकल्पसमाधिस्थानां निश्चयेन सर्वजीवसाधारणत्वेनाखंडैकज्ञानरूपं प्रतिभाति तथापि व्यवहारेण नानावर्णिकागतसुखाद्यनवपदार्थरूपं **दह ठाणिओ भणियो** यद्यपि निश्चयेन शुद्धबुद्धैकलक्षणस्तथापि व्यवहारेण पृथिव्यप्तेजोवायुप्रत्येकसाधारणवनस्पतिद्वित्रिचतुःपञ्चेन्द्रियरूपदशस्थानगतः । स एव । **जीवो** जीवपदार्थ एव दशविकल्परूपो भवति । अथवा द्वितीयव्याख्यानेन पृथग्भिन्नानि दशस्थानानि उपयुक्तपदस्य पृथग्व्याख्याने कृते सति तान्यपि दशस्थानानि भवन्तीत्युभयसंचारणेन विशेषः स्यादिति भावार्थः ॥ ७१ ॥ ७२ ॥ अथ मुक्तस्योर्ध्वगतिः संसारिणां मरणकाले षड्गतय इति प्रतिपादयति;—**पयडिट्ठिदि अणुभाग पदेसबंधेहिं सव्वदो मुक्को** प्रकृतिस्थित्यनुभागप्रदेशबंधैर्विभावरूपैः समस्तरागादिविभावरहितेन शुद्धात्मानुभूतिलक्षणध्यानबलेन सर्वतो मुक्तोपि **उड्ढं गच्छदि** स्वाभाविकानन्तज्ञानादिगुणैर्युक्तः सन्नेकसमयलक्षणाविग्रहगत्योर्ध्वं गच्छति शेषाः संसारिणो जीवाः **विदिसावज्जं गदिं**

कहा जाता है । फिर वही जीव [**अष्टाश्रय.**] आठ सिद्धोंके गुण अथवा आठकर्म के आश्रय होनेसे आठ प्रकारका भी है । फिर वही जीव [**नवार्थ**] नव पदार्थोंके भेदोंसे नव प्रकारका भी है । फिर वही जीवद्रव्य [**दशस्थानक**] पृथिवीकाय, अपकाय, तेजकाय, वायुकाय, प्रत्येक, साधारण, बेइन्द्रिय, तेइन्द्रिय, चतुरिन्द्रिय, पचेन्द्रिय इस प्रकार दशभेदोंसे दशप्रकार भी [**भणित**] कहा गया है ॥७१॥७२॥

आगे कहते हैं कि जो जीव मुक्त होय तो उसकी ऊर्ध्वगति होती है और जो अन्य जीव हैं ते छहों दिशाओंमें गति करते हैं । [**प्रकृतिस्थित्यनुभागप्रदेशबंधैः**] प्रकृतिबंध स्थितिबंध अनुभागबंध प्रदेशबंध इन चार प्रकारके बंधोंसे [**सर्वतः**] सर्वांग असंख्यातप्रदेशोंसे [**मुक्तः**] जो जीव छूटा है [**ऊर्ध्वं**] सिद्धक्षेत्रको गमन करता है **भावार्थ**—जो जीव अष्टकर्मरहित होता है सो एक ही समयमें अपने ऊर्ध्वगतिस्वभावसे लोकके अंतपर्यन्त सिद्धस्थानमें जाता है [**शेषाः**] अन्य बाकीके संसारी जीव हैं ते [**विदिग्वर्जां**] विदिशाओंको छोड़कर अर्थात्

बद्धजीवस्य षड्गतयः कर्मनिमित्ताः । मुक्तस्याप्यूर्ध्वगतिरेका स्वाभाविकीत्यत्रोक्तम् ॥७३॥
इति जीवद्रव्यास्तिकायव्याख्यानं समाप्तम् । अथ पुद्गलद्रव्यास्तिकायव्याख्यानम् ।
पुद्गलद्रव्यविकल्पादेशोऽयम् ।

खधा य खधदेसा खधपदेसा य होंति परमाणू ।
इदि ते चदुव्वियप्पा पुग्गलकाया मुणेयव्वा ॥ ७४ ॥

स्कधाश्च स्कधदेशाः स्कधप्रदेशाश्च भवन्ति परमाणवः ।
इति ते चतुर्विकल्पाः पुद्गलकाया ज्ञातव्याः ॥ ७४ ॥

पुद्गलद्रव्याणि हि कदाचित् स्कधपर्यायेण, कदाचित् स्कधदेशपर्य्यायेण, कदाचित्

जति मरणान्ते विदिग्वर्ज्यां पूर्वोक्तषट्कापक्रमलक्षणमनुश्रेणिसज्ञां गतिं गच्छन्ति इति । अत्र गाथासूत्रे "सदसिव सखो मडडि बुद्धो णइयाइगो य वइसेसा । ईसर मस्करि पूरण विदूसणट्ठ कय अट्ठ" इति गाथोक्ताष्टमतातरनिषेधार्थ "अट्ठविहकम्मवियला सीदीभूदा णिरजणा णिच्चा । अट्ठगुणा किदकिच्चा लोयग्गणिवासिणो सिद्धा" इति द्वितीयगाथोक्तलक्षण सिद्धस्वरूपमुक्तमित्य भिप्राय ॥ ७३ ॥ इति जीवास्तिकायसबधे नवाधिकाराणा चूलिकाव्याख्यानरूपेण गाथात्रय ज्ञातव्य । एव पूर्वोक्तप्रकारेण "जीवोत्ति हवदि चेदा" इत्यादि नवाधिकारसूचनार्थं गाथैका, प्रभुत्वमुख्यत्वेन गाथाद्वय, जीवत्वकथनेन गाथात्रय, स्वदेहप्रमितिरूपेण गाथाद्वय, अमूर्तगुण-ज्ञापनार्थं गाथात्रय, त्रिविधचेतनत्वकथनेन गाथाद्वय, तदनतर ज्ञानदर्शनोपयोगद्वयज्ञापनार्थं गाथा एकोनविंशति, कर्तृत्वभोक्तृत्वकर्मसयुक्तत्वत्रयव्याख्यानमुख्यत्वेन गाथा अष्टादश, चूलिका रूपेण गाथात्रयमिति समुदायेन त्रिपचाशद्गाथाभि पचास्तिकायषड्द्रव्यप्रतिपादकप्रथममहाधिकारमध्ये जीवास्तिकायनामा 'चतुर्थोन्तराधिकार' समाप्त । अथानतर चिदानदैकस्वभावशुद्धजीवास्तिकायाद्भिन्न हेयरूपे पुद्गलास्तिकायाधिकारे गाथादशक भवति । तद्यथा । पुद्गलस्कधव्याख्यानमुख्यत्वेन "खधा य खधदेसा" इत्यादि पाठक्रमेण गाथाचतुष्टय, तदनतरं परमाणुव्याख्यानमुख्यत्वेन द्वितीयस्थले गाथापचक, तत्र पचकमध्ये परमाणुस्वरूपकथनेन "सव्वेसिं खधाण" मित्यादिगाथासूत्रमेक, अथ परमाणूना पृथिव्यादिजातिभेदनिराकरणार्थं "आदेसमत्त" इत्यादि सूत्रमेक, तदनतर शब्दस्य पुद्गलद्रव्यपर्यायत्वस्थापनमुख्यत्वेन "सद्दो खधप्पभवो" इत्यादि सूत्रमेक, अथ परमाणुद्रव्यप्रदेशाधारेण समयादिव्यवहारकालमुख्यत्वेन एकत्वादिनिरूपणा

पूर्व पश्चिम उत्तर दक्षिण ये चार दिशा और ऊर्द्ध तथा अध इन छहों दिशाओंमें [गतिं] गतिको [यान्ति] करते हैं । भावार्थ—जो जीव मोक्षगामी हैं तिनको छोड़कर अन्य जितने जीव हैं वे समस्त छहों दिशाओंमें अनुश्रेणि गतिको धारण करते हैं पर विदिशाओंमें इनकी गति नहीं होती ॥ ७३ ॥

यह जीवद्रव्यास्तिकायका व्याख्यान पूर्ण हुआ ।

आगे पुद्गलद्रव्यास्तिकायका व्याख्यान करते हैं जिसमें प्रथम ही पुद्गलके भेद कहे

स्कधप्रदेशपर्य्यायेण, कदाचित् परमाणुत्वेनात्र तिष्ठन्ति । नान्यागतिरस्ति । इति तेषा चतुर्विकल्पत्वमिति ॥ ७४ ॥

पुद्गलद्रव्यविकल्पनिर्देशोयम्,—

खंध सयलसमत्थं तस्स दु अद्ध भणंति देसोत्ति ।
अद्धद्ध च पदेशो परमाणू चेव अविभागी ॥ ७५ ॥

स्कध' सकलसमस्तम्य त्वर्धं भणन्ति देश इति ।
अर्द्धार्द्ध च प्रदेश परमाणुश्चैवाविभागी ॥ ७५ ॥

अनतानंतपरमाण्वारब्धोऽप्येक स्कधनाम पर्य्याय' । तदर्धं स्कधदेशो नाम पर्य्याय ।

कथनेन च "णिद्धो णाणत्तगासो" इत्यादि सूत्रमेकं, तदनतरं परमाणुद्रव्यं रसवर्णादिव्याख्या-नमुख्यत्वेन "एयरस वण्ण" इत्यादि गाथासूत्रमेक, एव परमाणुद्रव्यप्ररूपणद्वितीयस्थले समुदायेन गाथापचक गत । अथ पुद्गलास्तिकायोपसहाररूपेण "उवभोज्ज" इत्यादि सूत्रमेक । एव गाथादशकपर्यंत स्थलत्रयेण पुद्गलाधिकारे समुदायपातनिका । तद्यथा । पुद्गलद्रव्यविकल्प-चतुष्टय कथ्यते;—खंदा य खंददेसा खंदपदेसा य होंति स्कदा स्कंददेशा स्कद-प्रदेशाश्चेति त्रय स्कदा भवन्ति **परमाणू** परमाणवश्च भवन्ति **इदि ते चदुव्वियप्पा पोग्गलकाया मुणेदव्वा** इति स्कदत्रय परमाणवश्चेति भेदेन चतुर्विकल्पास्ते पुद्गलकाया ज्ञातव्या इति । अत्रोपादेयभूतानतसुखरूपाच्छुद्धजीवास्तिकायाद्विलक्षणत्वाद्धेयतत्त्वमिदमिति भावार्थ ॥ ७४ ॥ अथ पूर्वोक्तस्कदादिचतुर्विकल्पानां प्रत्येकलक्षण कथयति;—**खंद सय-लसमत्थं तस्स दु अद्ध भणंति देसोत्ति अद्धद्ध च पदेसो** सकलसमस्तलक्षण स्कदो भवति तदर्धलक्षणो देशो भवति अर्द्धार्द्धलक्षण प्रदेशो भवति । तथाहि—समस्तोपि विवक्षित

जाते हैं। [स्कधा] एक पुद्गल पिंड तो स्कध जातिके हैं [च] और [स्कध-देशा] दूसरे पुद्गलपिंड स्कधदेश नामके हैं [च] तथा [स्कधप्रदेशा] एक पुद्गल स्कधप्रदेश नामके हैं और एक पुद्गल [परमाणव] परमाणु जातिके [भवन्ति] होते हैं [इति] इस प्रकार [ते] वे पूर्वमें कहेहुये [पुद्गल-काया'] पुद्गलकाय जे हैं ते [चतुर्विकल्पा] चार प्रकारके [ज्ञातव्या'] जानने योग्य हैं। भावार्थ—पुद्गलद्रव्यका चार प्रकार परिणमन है । इन चार प्रकारके पुद्गल परिणामोंके सिवाय और कोई भेद नहीं हैं। इनके सिवाय अन्य जो कोई भेद हैं व इन चारों भदोंमें ही गर्भित हैं ॥ ७४ ॥ आगें इन चार प्रकार पुद्गलोंका लक्षण कहते हैं । [स्कध'] पुद्गलकाय जो स्कध भेद हैं सो [सकलसमस्त] अनत समस्त परमाणुवोंका मिलकर एक पिंड होता है [तु] और [तस्य] उस पुद्गल स्कंधका [अर्द्ध] अर्द्धभाग [देश इति] स्कधदेश नामका [भणन्ति] अरहतदेव कहते हैं [च] फिर [अर्द्धार्द्ध] तिस स्कधके आधका आधा चौथाई भाग [स्कधप्रदेश']

१ साकं ।

च बादरसूक्ष्मत्वपरिणामविकल्पैः षट्प्रकारतामापद्य त्रैलोक्यरूपेण निष्पद्य स्थितवन्त इति । तथाहि—बादरबादरा, बादरा, बादरसूक्ष्मा, सूक्ष्मबादरा, सूक्ष्मा, सूक्ष्मसूक्ष्मा इति । तत्र छिन्ना स्वयं संधानासमर्था काष्ठपाषाणाद्या बादरबादरा । छिन्ना स्वयं संधानसमर्था क्षीरघृततैलतोयरसप्रभृतयो बादरा । स्थूलोपलम्भा अपि छेत्तुं भेत्तुमादातु मशक्या छायाऽऽतपतमोज्योत्स्नादयो बादरसूक्ष्मा । सूक्ष्मत्वेऽपि स्थूलोपलम्भा स्पर्शरसगन्धवर्णशब्दा सूक्ष्मबादरा सूक्ष्मत्वेऽपि हि करणानुपलभ्या कर्मवर्गणादय सूक्ष्मा । अत्यन्तसूक्ष्मा कर्मवर्गणाभ्योऽधो द्व्यणुकस्कन्धपर्यन्ता सूक्ष्मसूक्ष्मा इति ॥ ७६ ॥

तात्पर्य—लोक्यन्ते जीवादिपदार्था यत्र स लोक इति वचनात्पुद्गलादिषड्द्रव्यैर्निष्पन्नोऽयं लोक न चान्येन केनापि पुरुषविशेषेण क्रियते ह्रियते ध्रियते वेति ॥ ७६ ॥

अथ तानेव षड्भेदान् विवृणोति;—

पुढवी जलं च छाया चउरिंदियविसयकम्मपाओग्गा ।
कम्मातीदा एवं छब्भेया पोग्गला होंति ॥ १ ॥

पृथिवी जलं च छाया चक्षुर्विषयं विहाय चतुरिन्द्रियविषया कर्मप्रायोग्या कर्मातीता इति षड्भेदा पुद्गला भवन्ति । ते च कथंभूता । स्थूलस्थूला स्थूला स्थूलसूक्ष्मा सूक्ष्मस्थूला

स्पर्शरसवर्णगंध गुणके भेदोंसे षट्गुणी हानिवृद्धिके प्रभावसे पुद्गल नाम पाता है। और उस ही परमाणुमें किसी कालमें स्कंध होने की प्रगट शक्ति है जो कभी नहीं होती तौ भी परमाणुको पुद्गल संज्ञा है । और तीन प्रकारके जो स्कंध हैं वे अनंत परमाणुमिलकर एक पिंड अवस्थाको करते हैं । इसकारण उनमें भी पूरणगलन स्वभाव है और उनका भी नाम पुद्गल कहा जाता है [**ते**] वे पुद्गल [**षट्प्रकारा**] छैप्रकारके [**भवन्ति**] होते हैं । [**यै**] जिन पुद्गलोंमे [**त्रैलोक्य**] तीन लोक [**निष्पन्नं**] निर्मापित है । **भावार्थ**—वे छहप्रकारके पुद्गलस्कंध अपने स्थूल सूक्ष्म परिणामोंके भेदोंसे तीन लोककी रचनामें प्रवर्त्तते हैं—वे छह प्रकार कौन २ से हैं सो वताये जाते हैं । वादरवादर १ वादर २ वादरसूक्ष्म ३ सूक्ष्मवादर ४ सूक्ष्म ५ सूक्ष्म सूक्ष्म ६ येछह प्रकार जानने । जो पुद्गलपिंड दो खंड करने पर अपने आप फिर नहीं मिलैं ऐसे काष्ठपाषाणादिकको वादरवादर कहते हैं १ और जो पुद्गलस्कंध खंड खंड किये हुये अपने आप मिल जाय ऐसे दुग्ध घृत तैलादिक पुद्गलोंको वादर कहते हैं २ और जो देखनेमें तो थूल होंहिं खंड खंड करनेमें नहीं आव हस्तादिकसे ग्रहण करनेमें नहीं आवैं ऐसे धूप चंद्रमाकी चांदनी आदिक पुद्गल वादरसूक्ष्म कहलाते हैं ३ और जो स्कंध तो हैं सूक्ष्म परंतु स्थूलसे प्रति भासते हैं ऐसे स्पर्श रस गंध शब्दादिक पुद्गल सूक्ष्मवादर कहलाते हैं ४ और जो स्कंध अति सूक्ष्म हैं इंद्रियोंसे ग्रहण करनेमें नहीं आते एसे जो कर्मवर्गणादिक हैं वे सूक्ष्मपुद्गल कहलाते हैं ५ और जो

परमाणुव्याख्येयम्,—

सव्वेसिं खंधाणं जो अंतो तं वियाण परमाणू ।
सो सस्सदो असद्दो एक्को अविभागी मुत्तिभवो ॥ ७७ ॥

सर्वेषां स्कन्धानां योऽन्त्यस्तं विजानीहि परमाणुं ।
स शाश्वतोऽशब्दः एकोऽविभागी मूर्तिभवः ॥ ७७ ॥

उक्तानां स्कन्धपर्यायाणां योऽन्त्यो भेदः स परमाणुः । स तु पुनर्विभागाभावादविभागी । निर्विभागैकप्रदेशत्वादेकः । मूर्तद्रव्यत्वेन सदाप्यविनश्वरत्वान्नित्यः । अनादिनि

सूक्ष्माः सूक्ष्मसूक्ष्मा इति । तद्यथा । ये छिन्ना भेदे स्वयमेव संधातुमसमर्थास्ते स्थूलस्थूलाः भूपर्वतादयः, ये तु छिन्नाः सन्तः तत्क्षणादेव संधानेन स्वयमेव समर्थास्ते स्थूलाः सर्पिस्तैलजलादयः, ये तु हस्तेनादातुं देशान्तरं नेतुं अशक्यास्ते स्थूलसूक्ष्माः छायातपादयः, ये पुनः लोचनविषया न भवन्ति ते सूक्ष्मस्थूलाश्चतुरिन्द्रियविषयाः, ये तु ज्ञानावरणादिकर्मवर्गणायोग्यास्ते सूक्ष्मा इन्द्रियज्ञानाविषयाः, ये चातिसूक्ष्मत्वेन कर्मवर्गणातीतास्ते सूक्ष्मसूक्ष्माः कर्मवर्गणातीतेभ्यो (भेदेभ्यः) ऽन्यन्तसूक्ष्मा द्व्यणुकस्कन्धपर्यन्ता इति तात्पर्यं ॥ १ ॥ एवं प्रथमस्थले स्कन्धव्याख्यानमुख्यत्वेन गाथाचतुष्टयं समाप्तं । तदनंतरं परमाणुव्याख्यानमुख्यतया द्वितीयस्थले गाथापंचकं कथ्यते । तथाहि । शाश्वतादिगुणोपेतं परमाणुद्रव्यं प्रतिपादयति,—**सव्वेसिं खंधाणं जो अंतो तं वियाण परमाणू** यथा य एव कर्मस्कन्धानामन्तो विनाशस्तमेव शुद्धात्मानं विजानीहि तथा य एव षड्विधस्कन्धानामन्तोऽवसानो भेदस्तं परमाणुं विजानीहि **सो** स च । कथंभूतः । **सस्सदो** यथा परमात्मा टङ्कोत्कीर्णज्ञायकैकस्वभावेन द्रव्यार्थिकनयेनाविनश्वरत्वात् शाश्वतः तथा पुद्गलत्वेनाविनश्वरत्वात्परमाणुरपि नित्यः **असद्दो** यथा शुद्धजीवास्तिकायो निश्चयेन स्वसंवेदनज्ञानविषयोपि शब्दविषयः शब्दरूपो वा न भवतीत्यशब्दः तथा हि परमाणुरपि शक्तिरूपेण शब्दकारणभूतोपि व्यक्तिरूपेण शब्दपर्यायरूपो न भवतीत्यशब्दः **एक्को** यथा शुद्धात्मद्रव्यं निश्चयेन परोपाधिरहितत्वेन केवलमसहायमेकं भण्यते तथा परमाणु-

कर्मवर्गणाओंसे भी अति सूक्ष्म द्व्यणुकस्कंध ताईं जे हैं ते सूक्ष्मसूक्ष्म कहलाते हैं ॥ ७६ ॥

आगें परमाणुका स्वरूप कहते हैं, [**सर्वेषां**] समस्त [**स्कन्धानां**] स्कंधोंका [**यः**] जो [**अन्त्यः**] अंतका भेद है [**तं**] उसको [**परमाणुं**] परमाणु [**विजानीहि**] जानना । अर्थात्—ये जो पूर्वमें छह प्रकारके स्कंध कहे उनमेंसे जो अंतका भेद (अविभागी खंड) है सो परमाणु कहाता है [**सः**] वह परमाणु [**शाश्वतः**] त्रिकाल अविनाशी है यद्यपि स्कंधोंके मिलापसे एक पर्यायसे पर्यायांतरको प्राप्त होता है तथापि अपने द्रव्यस्वरूप सदा टंकोत्कीर्ण नित्य द्रव्य है । फिर कैसा है वह परमाणु? [**अशब्दः**] शब्दरहित है यद्यपि स्कंधके मिलापसे शब्द पर्यायको धरता है तथापि स्वरूपसे शब्द पर्यायसे रहित है । फिर कैसा है परमाणु?

स्येति । तत्र क्वचित्परमाणौ गंधगुणे, क्वचित् गंधरसगुणयो, क्वचित् गंधरसरूपगुणेषु अपकृष्यमाणेषु तदविभक्तप्रदेश' परमाणुरेव विनश्यतीति । न तदपकर्षो युक्त' । तत पृथिव्यप्तेजोवायुरूपस्य धातुचतुष्कस्यैक एव परमाणु कारण । परिणामवशात् विचित्रो हि परमाणो परिणामगुण क्वचित्कस्यचिद्गुणस्य व्यक्ताव्यक्तत्वेन विचित्रा परिणतिमादधाति । यथा च तस्य परिणामवशादव्यक्तो गंधादिगुणोऽस्तीति प्रतिज्ञायते न तथा शब्दोऽप्यव्यक्तोऽस्तीति ज्ञातु शक्यते । तस्यैकप्रदेशस्यानेकप्रदेशात्मकेन शब्देन सहैकत्वविरोधादिति ॥ ७८ ॥

पूर्व कथित एकोऽपि परमाणु पृथिव्यादिधातुचतुष्करूपेण कालान्तरेण परिणमति स परमाणुरिति ज्ञेय परिणामगुणो औदयिकादिभावचतुष्टयरहितत्वेन पारिणामिकगुण । पुन किंविशिष्ट । सयमसद्दो एकप्रदेशत्वेन स्कन्धान्तरपरमाणुपिंडलक्षणेन शब्दपर्यायेण सह विलक्षणत्वात्स्वय

कारण है । ये चार धातु इन परमाणुओंमे ही पैदा होते हैं । फिर कैसा है ? [परिणामगुण] परिणमन स्वभाववाला है [स्वय अशब्द] आप अशब्द है किंतु शब्दका कारण है । भावार्थ—परमाणु जो द्रव्य है उसमें स्पर्श रस गंध वर्ण ये चार गुण हैं। इन चारों ही गुणोंसे परमाणु मूर्तीक कहलाता है । परमाणु निर्विभाग है क्योंकि जो प्रदेश आदिमें है वही मध्य और अंतमें है इसकारण दूसरा भाग परमाणुका नहीं होता। द्रव्य गुणमें प्रदेशभेद नहीं होता इसकारण जो प्रदेश परमाणुका है वही प्रदेश स्पर्श रस गंध वर्णका जान लेना । ये चार गुण परमाणुमें सदा काल पाये जाते हैं परन्तु गौण मुख्यके भेदसे न्यूनाधिक भी इन गुणोंका कथन किया जाता है । पृथिवी जल अग्नि वायु ये चारों ही पुद्गलजातिय परमाणुओंसे उत्पन्न हैं । इनके परमाणुओंकी जाति जुदी नहीं है पर्यायके भेदसे भेद होता है । पृथिवी जातिके परमाणुओंमें चारों ही गुणोंकी मुख्यता है । जलमें गंध गुणकी गौणता है अन्य तीन गुणोंकी मुख्यता है । अग्निमें गंध और रसकी गौणता है स्पर्श और वर्णकी मुख्यता है । वायुमें तीन गुणोंकी गौणता है स्पर्श गुणकी मुख्यता है । पर्यायोंके कारण परमाणुमें नानाप्रकारके परिणामगुण होते हैं । कहीं पर किसी एक गुणकी प्रगटता अप्रगटताके कारण नानाप्रकारकी परणतिको धारण करते हैं । प्रश्न—जिस प्रकार परमाणुओंके परिणमनसे गंधादिक गुण हैं उसी प्रकार शब्द भी प्रगट होता होगा ? ऐसी जो कोई शंका करै तो उसका समाधान यह है कि—परमाणु एकप्रदेशी है इस कारण शब्द प्रगट नहीं होता शब्द है

---

१ पूर्वोक्तपु एतपु [illegible] परमाणु [illegible] २ तस्य परमाणोरपकर्षो विनाशो न युक्त
३ परमाणु ।

शब्दस्य पुद्गलस्कन्धपर्यायत्वख्यापनमेतत्,—

सद्दो खंधप्पभवो खंधो परमाणुसंगसंघादो ॥
पुट्ठेसु तेसु जायदि सद्दो उप्पादगो णियदो ॥ ७९ ॥

शब्दः स्कन्धप्रभवः स्कन्धः परमाणुसङ्गसङ्घातः ।
स्पृष्टेषु तेषु जायते शब्द उत्पादको नियतः ॥ ७९ ॥

इह हि बाह्यश्रवणेन्द्रियावलम्बितो भावेन्द्रियपरिच्छेद्यो ध्वनिः शब्दः । स खलु स्वरूपेणानन्तपरमाणूनामेकस्कन्धो नाम पर्यायः । बहिरङ्गसाधनीभूतमहास्कन्धेभ्यः तथाविधपरिणामेन समुत्पद्यमानत्वात् स्कन्धप्रभवः । यतो हि परस्पराभिहतेषु महास्कन्धेषु शब्दः समुपजायते । किंच स्वभावनिर्वृत्ताभिरेवानन्तपरमाणुमयीभिः शब्दयोग्यवर्गणाभिरन्योन्य

व्यक्तिरूपेणाशब्द इति सूत्रार्थः ॥ ७८ ॥ एवं परमाणूनां पृथिव्यादिजातिभेदनिराकरणकथनेन द्वितीयगाथा गता । अथ शब्दस्य पुद्गलस्कन्दपर्यायत्वं दर्शयति,—**सद्दो** श्रवणेन्द्रियावलम्बनो भावेन्द्रियपरिच्छेद्यो ध्वनिविशेषः शब्दः । स च किंविशिष्टः । **खंदप्पभवो** स्कन्देभ्यः सकाशादुत्पन्नः प्रभव इति स्कन्दप्रभवः । स्कन्दलक्षणं कथ्यते । **खंदो परमाणुसंगसंघादो** स्कन्दो भवति । कथंभूतः । परमाणुसंगसंघातः अनन्तपरमाणुसंगानां समूहानामपि संघातः समुदायः । इदानीं स्कन्देभ्यः सकाशाच्छब्दस्य प्रभवत्वमुत्पत्तिं कथयति । **पुट्ठेसु तेसु** स्पृष्टेषु तेषु पूर्वोक्तेषु स्कन्देषु स्पृष्टेषु लग्नेषु परस्परं संघट्टितेषु सत्सु **जायदि** जायते प्रभवति । स कः कर्ता । **सद्दो** पूर्वोक्तशब्दः । अयमत्राभिप्रायः । द्विविधाः स्कन्दा भवन्ति भाषावर्गणायोग्या ये तेऽभ्यन्तरे कारणभूताः सूक्ष्मास्ते च निरन्तरं लोके तिष्ठन्ति ये तु बहिरङ्गकारणभूतास्ताल्वोष्ठपुटव्यापारघटाभिघातमेघादयस्ते स्थूलाः क्वापि क्वापि तिष्ठन्ति न सर्वत्र यत्रेयमुभयसामग्री समुदिता तत्र भाषावर्गणाः शब्दरूपेण परिणमन्ति न सर्वत्र । स च शब्दः किं विशिष्टः । **उप्पादिगो णियदो** भाषावर्गणास्कन्देभ्य उत्पद्यते इत्युत्पादकः नियतो निश्चितः न चाकाशद्र-

---

सो अनेक परमाणुओंके स्कंधोंसे उत्पन्न होता है इसकारण परमाणु अशब्दमय है ॥ ७८ ॥
आगें शब्दको पुद्गलका पर्यायत्व दिखाते हैं । [**शब्दः**] शब्द जो है सो [**स्कन्धप्रभवः**] स्कंधसे उत्पन्न है [**परमाणुसङ्गसङ्घातः**] अनंत परमाणुओंके मिलापका समूह [**स्कन्धः**] स्कंध होता है । [**तेषु स्पृष्टेषु**] उन स्कंधोंके परस्पर स्पर्श होनेपर [**नियतः**] निश्चित [**उत्पादकः**] अन्य वर्गणाओंको शब्दरूपभाव करनेहारा ऐसा [**शब्दः**] शब्द [**जायते**] उत्पन्न होता है । **भावार्थ**—द्रव्यकर्णेन्द्रियके आधारसे भावकर्णेन्द्रियके द्वारा जो धुनि सुनी जाय उस शब्द कहते हैं । वह शब्द अनंत परमाणुओंका पिंड अर्थात् स्कंधोंसे ही उत्पन्न होता है क्योंकि जब परस्पर महास्कंधोंका संघट्ट

---

१ शब्दरूपेण २ भाषावर्गणादिरूपेण ।

परमाणोरेकप्रदेशत्वख्यापनमेतत्,—

णिचो णाणवकासो ण सावकासो पदेसदो भेत्ता ।
खंधाण पि य कत्ता पविहत्ता कालसंखाणं ॥ ८० ॥

नित्यो नानवकाशो न सावकाशः प्रदेशतो भेत्ता ।
स्कंधानामपि च कर्ता प्रविभक्ता कालसंख्यायाः ॥ ८० ॥

परमाणुः स खल्वेकेन प्रदेशेन रूपादिगुणसामान्यभाजा सर्वदैवाविनश्वरत्वान्नित्यः ।

सर्वं हेयतत्त्वमेतस्माद्भिन्नं शुद्धात्मतत्त्वमुपादेयमिति भावार्थः ॥ ७९ ॥ एवं शब्दस्य पुद्गलद्रव्यपर्यायत्वस्थापनामुख्यत्वेन तृतीयगाथा गता । अथ परमाणोरेकप्रदेशत्वं व्यवस्थापयति,—**णिच्चो** नित्यः । कस्मात् । **पदेसदो** प्रदेशतः परमाणोः खलु एकेन प्रदेशेन सर्वदैवाविनश्वरत्वान्नित्यो भवति **णाणवगासो** नानवकाशः किंत्वेकेन प्रदेशेन स्वकीयवर्णादिगुणानामवकाशदानात्सावकाशः **ण सावगासो** न सावकाशः किंत्वेकेन प्रदेशेन द्वितीयादिप्रदेशाभावान्निरवकाशः **भेत्ता खदाणं** भेत्ता स्कंधानां **कत्ता अवि य** कर्ता अपि च स्कंधानां जीववत् । तद्यथा । यथायं जीवः स्वप्रदेशगतरागादिविकल्परूपस्निग्धभावेन परिणतः सन् कर्मस्कंधानां भेत्ता विनाशको भवति तथा परमाणुरप्येकप्रदेशगतस्निग्धभावेन परिणतः सन् स्कंधानां विघटनकाले भेत्ता भेदको भवति । यथा स एव जीवो निःस्नेहात्परमात्मतत्त्वाद्विपरीतेन स्वप्रदेशगतमिथ्यात्वरागादिस्निग्धभावेन परिणतः सन्नवतरज्ञानावरणादिकर्मस्कंधानां कर्ता भवति तथा स एव परमाणुः स्वप्रदेशगतस्निग्धभावेन परिणतः सन् द्व्यणुकादिस्कंधानां कर्ता भवति । अत्र योसौ स्कंधानां भेदको भणितः स कार्यपरमाणुरुच्यते यस्तु कारकस्तेषां स कारणपरमाणुरिति कार्यकारणभेदेन द्विधा परमाणुर्भवति । तथा चोक्तं । "स्कंधभेदाद्भवेदाद्यः स्कंधानां जनकोपरः ।" अथवा

हैं वे वैस्रसिक अभाषात्मक शब्द होते हैं । ये समस्त प्रकारके ही शब्द पुद्गल स्कंधोंसे उत्पन्न होते हैं ऐसा जानना ॥ ७९ ॥ आगे परमाणुके एकप्रदेशत्व दिखाते हैं,— परमाणु कैसा है ? [नित्यः] सदा अविनाशी है । अपने एक प्रदेशकर रूपादि गुणोंसे भी कभी त्रिकालमें रहित नहीं होता । फिर कैसा है ? [न अनवकाशः] जगह देनेकेलिये समर्थ है परमाणुके प्रदेशसे जुदे नहीं ऐसे जो हैं उसमें स्पर्शादि गुण उनको अवकाश देनेकेलिये समर्थ है । फिर कैसा है ? [न सावकाशः] जगह देता भी नहीं अपने एक प्रदेशकर आदि मध्य अंतमें निर्विभाग एक ही है इसकारण दो आदि प्रदेशोंकी समाइ (जगह) उसमें नहीं है । इसलिये अवकाशदान देनेको असमर्थ भी है । फिर कैसा है ? [प्रदेशतः भेत्ता] अपने एक ही प्रदेशसे स्कंधोंका भेद करनेवाला है । जब अपने बिछुरनेका समय पाता है उस समय स्कंधसे निकल जाता है इसकारण स्कंधका भेद करनेवाला कहा जाता है । फिर कैसा है ? [स्कंधानां] स्कंधोंका [कर्ता अपि] कर्ता भी है अर्थात् अपना कालपाकर अपनी मिलनशक्तिसे

परमाणुद्रव्ये गुणपर्यायवृत्तिप्ररूपणमेतत्,—

एयरसवण्णगंधं दो फासं सद्दकारणमसद्दं ।
खंधतरिदं दव्वं परमाणुं तं वियाणेहि ॥ ८१ ॥

एकरसवर्णगंधं द्विस्पर्शं शब्दकारणमशब्दम् ।
स्कंधांतरितं द्रव्यं परमाणुं तं विजानीहि ॥ ८१ ॥

सर्वत्रापि परमाणौ रसवर्णगंधस्पर्शाः सहभुवो गुणाः । ते च क्रमप्रवृत्तैस्तत्र स्वपर्य्यायैर्वर्तंते । तथाहि—पञ्चानां रसपर्य्यायाणामन्यतमेनैकेनैकदा रसो वर्तते । पञ्चानां वर्णपर्य्यायाणामन्यतमेनैकेनैकदा वर्णो वर्तते । उभयोर्गंधपर्य्याययोरन्यतरेणैकेनैकदा गंधो वर्तते । चतुर्णां शीतस्निग्धशीतरूक्षोष्णस्निग्धोष्णरूक्षरूपाणां स्पर्शपर्य्यायद्वंद्वानामन्यतमेनैकेनैकदा स्पर्शो वर्तते । एवमयमुक्तगुणवृत्तिः परमाणुः शब्दस्कंधपरिणतिशक्तिस्वभावात्

तु या वर्णादिशक्तिः सा तूत्कृष्टा भावसंख्येति । एवं जघन्योत्कृष्टा प्रत्येकं द्रव्यक्षेत्रकालभावसंख्या ज्ञातव्या ॥ ८० ॥ एवं परमाणुद्रव्यप्रदेशाधारं कृत्वा समयादिव्यवहारकालकथनमुख्यत्वेन एकत्वादिसंख्याकथनेन च द्वितीयस्थले चतुर्थगाथा गता । अथ परमाणुद्रव्ये गुणपर्यायस्वरूपं कथयति,—**एयरसवण्णगंधं दोफासं** एकरसवर्णगंधद्विस्पर्शं । तथाहि—तत्र परमाणौ तिक्तादिपंचरसपर्यायाणामेकतमेनैकेनैकदा रसो वर्तते शुक्लादिपंचवर्णपर्यायाणामेकतमेनैकेनैकदा वर्णो वर्तते सुरभिदुरभिरूपगंधपर्याययोर्द्वयोरेकतरेणैकेनैकदा गंधो वर्तते शीतस्निग्धशीतरूक्षउष्णस्निग्धउष्णरूक्षरूपाणां चतुर्णां स्पर्शपर्यायद्वंद्वानामेकतमेनैकेनैकदा स्पर्शो वर्तते **सद्दकारणमसद्दं** शब्दकारणोप्यशब्दः आत्मवत् । यथात्मा व्यवहारेण ताल्वोष्ठपुटव्यापारेण शब्दकारणभूतोपि निश्चये नातींद्रियज्ञानविषयत्वाच्छब्दज्ञानविषयो न भवति शब्दादिपुद्गलपर्यायरूपो वा न भवति तेन कारणेनाशब्दः तथा परमाणुरपि शक्तिरूपेण शब्दकारणभूतोप्येकप्रदेशत्वेन शब्दव्यक्त्यभावाद् शब्दः **खंदतरिदं दव्वं परमाणुं तं वियाणाहि** यमेवमुक्तवर्णादिगुणशब्दादिपर्यायवृत्तिविशि

उत्कृष्ट भेदसे उस भेद संख्याको भी करता है । यह चार प्रकारका भेदभाव संख्या परमाणुजनित जान लेना ॥ ८० ॥ आगें परमाणु द्रव्यमें गुणपर्यायका स्वरूपकथन करते हैं;—हे शिष्य ! ['यत्'] जो द्रव्य [एकरसवर्णगंध] एक है रस वर्ण गंध जिसमें ऐसा [द्विस्पर्शं] दो स्पर्श गुणवाला है [शब्दकारणं] शब्दकी उत्पत्तिका कारण है [अशब्दं] अपने एक प्रदेशकर शब्दत्वरहित है [स्कंधांतरितं] पुद्गलपिंडसे जुदा है [तं द्रव्यं] उस द्रव्यको [परमाणुं] परमाणु [विजानीहि] जान । भावार्थ—एक परमाणुमें पुद्गलके जीतगुणोंमेंसे जो पांच रस हैं उनमेंसे कोई एक रस पाया जाता है । पांच वर्णोंमेंसे कोई एक वर्ण होता है । इसीप्रकार दो गंधोंमेंसे कोई एक गंध तथा शीतस्निग्ध, शीतरूक्ष, उष्णस्निग्ध, उष्णरूक्ष, इन चार स्पर्शके युगलोंमेंसे एक कोई युगल होता है । इस प्रकार एक परमाणुमें पांच गुण

शब्दकारण । एकप्रदेशत्वेन शब्दपर्य्यायपरिणतिवृत्त्यभावादशब्द । स्निग्धरूक्षत्वप्रत्ययप्रवशादनेकपरमाण्वेकत्वपरिणतिरूपस्कन्धान्तरितोऽपि स्वभावमपरित्यजन्नुपात्तसंख्यत्वादेकमेव द्रव्यमिति ॥ ८१ ॥

सकलपुद्गलविकल्पोपसंहारोऽयम्,—

उवभोज्जमिंदियेहिं य इंदिय काया मणो य कम्माणि ।
जं हवदि मुत्तमण्णं तं सव्वं पुग्गलं जाणे ॥ ८२ ॥

उपभोग्यमिन्द्रियैश्चेन्द्रियं कायां मनश्च कर्माणि ।
यद्भवति मूर्त्तमन्यत् तत्सर्वं पुद्गलं जानीयात् ॥ ८२ ॥

स्कन्धांतरित द्रव्यरूपस्कन्दपरमाणु विजानीहि परमात्मवदेव । तद्यथा । यथा परमात्मा व्यवहारेण द्रव्यभावरूपकर्मस्कन्दांतगतोऽपि निश्चयनयेन शुद्धबुद्धैकस्वभाव एव तथा परमाणुरपि व्यवहारेण स्कंदांतर्गतोऽपि निश्चयनयेन स्कंदबहिर्भूतशुद्धद्रव्यरूप एव । अथवा स्कंदांतरित इति कोऽर्थः स्कंदात्पूर्वमेव भिन्न इत्यभिप्रायः ॥ ८१ ॥ एवं परमाणुद्रव्यवर्णादिगुणस्वरूपशब्दादिपर्यायस्वरूपकथनेन पंचमगाथा गता । इति परमाणुद्रव्यरूपेण द्वितीयस्थले समुदायेन गाथापंचकं गतं । अथ सकलपुद्गलभेदानामुपसंहारमावेदयति,—**उवभोज्जमिंदियेहिं य** वीतरागातीन्द्रियसुखास्वादरहितानां जीवानां यदुपभोग्यं पंचेन्द्रियविषयस्वरूपं **इंदियकाया** अतीन्द्रियात्मस्वरूपाद्विपरीतानीन्द्रियाणि अशरीरात्मपदार्थाप्रतिपक्षभूता औदारिकवैक्रियिकाहारकतैजसकार्मणशरीरसंज्ञाः पंचकायाः **मणोय** मनोगतविकल्पजालरहितात् शुद्धजीवास्तिकायाद्विपरीतं मनश्च **कम्माणि** कर्मरहितात्मद्रव्यात् प्रतिकूलानि ज्ञानावरणाद्यष्टकर्माणि **जं हवदि मुत्तिमण्णं** अमूर्तात्मस्वभावात्प्रतिपक्षभूतमन्यदपि यन्मूर्तं प्रत्येकानंतसंख्येयासंख्येयानंताणुस्कंदरूपमनंतविभागिपरमाणुरूपं च **तं सव्वं पोग्गलं जाणे** तत्सर्वमन्यच्च नोकर्मादिकं पुद्गलं जानीहि । इति पुद्गलद्रव्यो

जानने । यह परमाणु स्कंधभावको परणया हुआ शब्दपर्यायका कारण है । और जब स्कंधसे जुदा होता है तब शब्दसे रहित है । यद्यपि अपने स्निग्धरूक्ष गुणोंके कारण पाकर अनेक परमाणुरूपस्कंधपरणतिको धरकर एक होता है तथापि अपने एकरूपसे स्वभावको नहीं छोडता सदा एक ही द्रव्य रहता है ॥ ८१॥ आगें समस्त पुद्गलोंके भेद संक्षेपतासे दिखाये जाते हैं,—['यत्'] जो [इन्द्रियैः] पांचों इन्द्रियोंसे [उपभोग्यं] स्पर्श रस गंध वर्ण शब्दरूप पांच प्रकारके विषय भोगनेमें आते हैं [च] और [इन्द्रियं] स्पर्श जीभ नासिका चक्षु नेत्र ये पांच प्रकारकी द्रव्यइंद्रिय [कायाः] औदारिक वैक्रियिक, आहारक, तैजस और कार्माण ये पांच प्रकारके शरीर [च] और [मनः] पौद्गलीक द्रव्यमन तथा [कर्माणि] द्रव्यकर्म नोकर्म और [यत्] जो कुछ [अन्यत्] और भी [मूर्त्तं] मूर्तीक पदार्थ [भवति] है [तत्सर्वं] वे समस्त [पुद्गलं] पुद्गल द्रव्य [जानीयात्] जानो । भावार्थ—

इन्द्रियविषयाः स्पर्शरसगन्धवर्णशब्दाश्च, द्रव्येन्द्रियाणि स्पर्शनरसनघ्राणचक्षुःश्रोत्राणि, कायाः औदारिकवैक्रियकाहारकतैजसकार्मणानि, द्रव्यमनोद्रव्यकर्माणि नोकर्माणि, विचित्रपर्यायोत्पत्तिहेतवोऽनन्ताऽनन्ताणुवर्गणा, अनन्ताऽसंख्येयाणुवर्गणा, अनन्ता संख्येयाणुवर्गणा, द्व्यणुकस्कन्धपर्यन्ता परमाणवश्च, यदन्यदपि मूर्तं तत्सर्वं पुद्गलविकल्पत्वेनोपसंहर्तव्यमिति ॥ ८२ ॥ इति पुद्गलद्रव्यास्तिकायव्याख्यानं समाप्तम् ।

अथ धर्माधर्मद्रव्यास्तिकायव्याख्यानम् । धर्मस्वरूपाख्यानमेतत्,—

धम्मत्थिकायमरसं अवण्णगंधं असद्दमप्फासं ।
लोगोगाढं पुट्ठं पिहुलमसंखादियपदेसं ॥ ८३ ॥

धर्मास्तिकायोऽरसोऽवर्णगन्धोऽशब्दोऽस्पर्शः ।
लोकावगाढः स्पृष्टः पृथुलोऽसंख्यातप्रदेशः ॥ ८३ ॥

धर्मो हि स्पर्शरसगन्धवर्णानामत्यन्ताभावादमूर्तस्वभावः । तत एव चाशब्दः । सकललोकाकाशाभिव्याप्यावस्थितत्वाल्लोकावगाढः । अयुतसिद्धप्रदेशत्वात् स्पृष्टः । स्वभावादेव

पसंहार ॥८२॥ एवं पुद्गलास्तिकायोपसंहाररूपेण तृतीयस्थले गाथैका गता । इति पञ्चास्तिकायषड्द्रव्यप्रतिपादकप्रथममहाधिकारे गाथादशकपर्यंतं स्थलत्रयेण पुद्गलास्तिकायनामा पंचमोंतराधिकारः समाप्तः ॥ अथानंतरमनंतकेवलज्ञानादिरूपशुद्धोपादेयभूतात् शुद्धजीवास्तिकायात्सकाशाद्भिन्ने हेयरूपे धर्माधर्मास्तिकायाधिकारे गाथासप्तकं भवति तत्र गाथासप्तकमध्ये धर्मास्तिकायस्वरूपकथनमुख्यत्वेन "धम्मत्थिकायमरसं" इत्यादि पाठक्रमेण गाथात्रयं, तदनंतरमधर्मास्तिकायस्वरूपनिरूपणमुख्यत्वेन "जह हवदि" इत्यादि गाथासूत्रमेकं, अथ धर्माधर्मोभयसमर्थनमुख्यत्वेन तयोरस्तित्वाभावे दूषणमुख्यत्वेन च 'जादो अलोग' इत्यादि पाठक्रमेण गाथात्रयमिति । एवं सप्तगाथाभिः स्थलत्रयेण धर्माधर्मास्तिकायव्याख्याने समुदायपातनिका । तद्यथा । धर्मास्तिकायस्वरूपं कथयति,—**धम्मत्थिकायं** धर्मास्तिकायो भवति **अरसमवण्णमगंधमसद्दमप्फासं** रसवर्णगंधशब्दस्पर्शरहितः **लोगोगाढं** लोकव्यापकः **पुट्ठं** निर्विकारस्वसंवेदनज्ञानपरि-

पांच प्रकार इन्द्रियोंके विषय, पांच प्रकारकी इन्द्रियें, द्रव्यमन, द्रव्यकर्म, नोकर्म, इनके सिवाय और जो अनेक पर्यायोंकी उत्पत्तिके कारण नानाप्रकारकी अनंतानंत पुद्गलवर्गणायें हैं अनंती असंख्येयाणुवर्गणा हैं और अनंती वा असंख्याती संख्येयाणुवर्गणा हैं, दो अणुके स्कंधतांई और परमाणु अविभागी इत्यादि जो भेद हैं वे समस्त ही पुद्गलद्रव्यमयी जानने यह पुद्गलद्रव्यास्तिकायका व्याख्यान पूर्ण हुवा ॥ ८२ ॥ आगें धर्म अधर्म द्रव्यास्तिकायका व्याख्यान किया जाता है जिसमेंसे प्रथम ही धर्म द्रव्यका स्वरूप कहा जाता है,—[**धर्मास्तिकाय.**] धर्मद्रव्य जो है सो काय

१ अशरीरत्वम् ।

गाढो निःसृतत्वात्पृथुलः । निश्चयादेकप्रदेशोऽपि व्यवहारनयेनासंख्यातप्रदेश इति ॥ ८३ ॥

धर्मस्यावशिष्टस्वरूपाख्यानमेतत्।—

> अगुरुगलघुगेहिं सया तेहिं अणंतेहिं परिणदं णिच्चं ।
> गदिकिरियाजुत्ताणं कारणभूदं सयमकज्जं ॥ ८४ ॥
>
> अगुरुलघुकैः सदा तैः अनन्तैः परिणतः नित्यः ।
> गतिक्रियायुक्तानां कारणभूतः स्वयमकार्यः ॥ ८४ ॥

अपि च धर्मः अगुरुलघुभिर्गुणैरगुरुलघुत्वाभिधानस्य स्वरूपप्रतिष्ठत्वनिबन्धनस्य स्वभावस्याविभागपरिच्छेदैः प्रतिसमयसम्भवत्षट्स्थानपतितवृद्धिहानिभिरनन्तैः सदा परिण

णाज्जीवप्रदेशेषु परमानन्दैकलक्षणसुखरसास्वादसमरसीभाववत् सिद्धक्षेत्रे सिद्धराशिवत् शून्यघटे शब्दवत् स्थितः परस्परप्रदेशव्यवधानरहितत्वेन निरन्तर नच निर्जनप्रदेशे भाविता-त्मनिवासस्वरूपारे जनवत्सान्तर, बहुल अभव्यजीवप्रदेशेषु मिथ्यात्वरागादिवत्तथैव नभो-देशे पृथुलोऽनादिनिधनत्वेन स्वभावनिर्मितः न च घटवत्समुद्घाते जीवप्रदेशवल्लोके धर्मादिप्रदेश-स्थितप्रदेशः पुनरिदानीं निर्मितः । पुनरपि किंविशिष्टः । असंखादियपदेसं निश्चयेनाखण्डै-कप्रदेशोऽपि सद्भूतव्यवहारेण लोकाकाशप्रमितासंख्येयप्रदेशः इति सूत्रार्थः ॥ ८३ ॥ अथ धर्मस्यावशिष्टस्वरूपं प्रतिपादयति;—अगुरुगलहुगेहिं सदा तेहिं अणंतेहिं परिणदं

रहित प्रवर्ते है । कैसा है वह धर्म द्रव्य ? [अरस] पांच प्रकारके रसरहित [अवर्णगंध] पांच प्रकारके वर्ण और दो प्रकारके गंधरहित [अशब्द] शब्दपर्यायसे रहित [अस्पर्श] आठ प्रकारके स्पर्श गुणरहित है । फिर कैसा है ? [लोकावगाढ] समस्त लोकको व्याप्त होकर तिष्ठता है [स्पृष्ट] अपने प्रदेशोंके स्पर्शसे अखंडित है [पृथुल] स्वभावहीसे सब जगहँ विस्तृत है । और [असंख्यातप्रदेशा] यद्यपि निश्चयनयसे एक अखंडित द्रव्य है तथापि व्यवहारसे असंख्यातप्रदेशी है । भावार्थ—धर्मद्रव्य स्पर्श रस गंध वर्ण गुणोंसे रहित है इसकारण अमूर्तीक है क्योंकि स्पर्श रस गंध वर्णवती वस्तु सिद्धांतमें मूर्तीक ही है । ये चार गुण जिसमें नहीं होय उसीका नाम अमूर्तीक है । इस धर्मद्रव्यमें शब्द भी नहीं है क्योंकि शब्द भी मूर्तीक होते हैं इसकारण शब्द पर्यायसे रहित है । लोकप्रमाण असंख्यातप्रदेशी है । यद्यपि अखंडद्रव्य है परंतु भेदविवक्षाके लिये परमाणुओंद्वारा असंख्यात प्रदेशी गिना जाता है ॥ ८३ ॥ आगे फिर भी धर्मद्रव्यका स्वरूप कुछ विशेषता कर दिखाया जाता है [सदा] सदाकाल [तैः] उन प्रसिद्ध अविनाशी करनहार [अगुरुलघुक] अगुरु लघु नामक [अनंतैः] अनंत गुणोंसे [परिणत]

तत्वादुत्पादव्ययभावेऽपि स्वरूपादप्रच्यवनान्नित्यः गतिक्रियापरिणतानामुदासीनाविनाभूतसहायमात्रत्वात्कारणभूतः । स्वास्तित्वमात्रनिर्वृतत्वात् स्वयमकार्य इति ॥ ८४॥

धर्मस्य गतिहेतुत्वे दृष्टान्तोऽयम्,—

उदयं जह मच्छाणं गमणाणुग्गहयरं हवदि लोए।
तह जीवपुग्गलाणं धम्मं दव्वं वियाणेहि ॥ ८५ ॥

उदकं यथा मत्स्यानां गमनानुग्रहकरं भवति लोके ।
तथा जीवपुद्गलानां धर्मं द्रव्यं विजानीहि ॥ ८५ ॥

अगुरुलघुकै सदा तैरनंतै परिणत प्रतिसमयमभवत्षट्स्थानपतितवृद्धिहानिभिरनंतैरविभागपरिच्छेदै परिणता येऽगुरुलघुकगुणा स्वरूपप्रतिष्ठत्वनिबन्धनभूतास्तैः कृत्वा पर्यायार्थिकनयेनोत्पादव्ययपरिणतोपि द्रव्यार्थिकनयेन **णिच्चं** नित्यं **गतिकिरियाजुत्ताणं कारणभूदं** गतिक्रियायुक्तानां कारणभूतं यथा सिद्धो भगवानुदासीनोपि सिद्धगुणानुरागपरिणतानां भव्यानां सिद्धगतेः सहकारिकारणं भवति तथा धर्मोपि स्वभावेनैव गतिपरिणतजीवपुद्गलानामुदासीनोपि गतिसहकारिकारणं भवति **सयमकज्जं** स्वयमकार्यं यथा सिद्धः स्वकीयशुद्धास्तित्वेन निष्पन्नत्वाद्येन केनापि न कृत इत्यकार्यः तथा धर्मोपि स्वकीयास्तित्वेन निष्पन्नत्वादकार्य इत्यभिप्रायः ॥८४॥ अथ धर्मस्य गतिहेतुत्वे लोकप्रसिद्धदृष्टांतमाह,—उदकं यथा मत्स्यानां गमनानुग्रहकरं भवति लोके तथैव जीवपुद्गलानां धर्मद्रव्यं विजानीहि हे शिष्य । तथाहि—यथा हि जलं स्वयमगच्छ

समय समयमें परिणमता है । फिर कैसा है ? [**नित्यः**] टंकोत्कीर्ण अविनाशी वस्तु है । फिर कैसा है ? [**गतिक्रियायुक्तानां**] गमन अवस्थाकर सहित जो जीव पुद्गल हैं तिनको [**कारणभूतं**] निमित्तकारण है । फिर कैसा है ? [**स्वयमकार्यं**] किसीसे उत्पन्न नहीं हुआ है । **भावार्थ**—धर्मद्रव्य सदा अविनाशी टंकोत्कीर्ण वस्तु है । यद्यपि अपने अगुरुलघु गुणसे षट्गुणी हानिवृद्धिरूप परिणमता है, परिणामसे उत्पादव्ययसंयुक्त है तथापि अपने ध्रौव्य स्वरूपसे चलायमान नहीं होता क्योंकि द्रव्य वही है जो उपजै विनशै थिर रहै । इसकारण यह धर्मद्रव्य अपने ही स्वभावको परिणये जो पुद्गल तिनको उदासीन अवस्थासे निमित्तमात्र गतिको कारणभूत है । और यह अपनी अवस्थासे अनादि अनंत है, इस कारण कार्यरूप नहीं हैं । कार्य उसे कहते हैं जो किसीसे उपज्या होय । गतिको निमित्तपाय सहायी है, इसलिये यह धर्मद्रव्य कारणरूप है किंतु कार्य नहीं है ॥ ८४ ॥ आगे धर्मद्रव्य गतिको निमित्तमात्र सहाय किस दृष्टांतकर है सो दिखाया जाता है,–[**लोके**] इस लोकमें [**यथा**] जैसें [**उदकं**] जल [**मत्स्यानां**] मच्छियोंको [**गमनानुग्रहकरं**] गमनके उपका-

---

१ धर्मं विना गमनं नास्ति २ जीवपुद्गलानाम् ।

यथोदकं स्वयमगच्छदगमयंच स्वयमेव गच्छतां मत्स्यानामुदासीनाऽविनाभूतसहायकारणमात्रत्वेन गमनमनुगृह्णाति । तथा धर्मोऽपि स्वयमगच्छन् अगमयंश्च स्वयमेव गच्छतां जीवपुद्गलानामुदासीनाऽविनाभूतसहायकारणमात्रत्वेन गमनमनुगृह्णाति इति ॥ ८५ ॥

अधर्मस्वरूपाख्यानमेतत्,—

जह हवदि धम्मदव्वं तह तं जाणेह दव्वमधमक्खं ।
ठिदिकिरियाजुत्ताणं कारणभूदं तु पुढवीव ॥ ८६ ॥

यथा भवति धर्मद्रव्यं तथा तज्जानीहि द्रव्यमधर्माख्यं ।
स्थितिक्रियायुक्तानां कारणभूतं तु पृथिवीव ॥ ८६ ॥

मत्स्यानप्रेरयत्तेषां स्वयं गच्छतां गतेः सहकारिकारणं भवति तथा धर्मोऽपि स्वयमगच्छन्सन्नप्रेरयंश्च स्वयमेव गतिपरिणतानां जीवपुद्गलानां गतेः सहकारिकारणं भवति । अथवा भव्यानां सिद्धगतेः पुण्यवत् । तद्यथा । यथा रागादिदोषरहितः शुद्धात्मानुभूतिसहितो निश्चयधर्मो यद्यपि सिद्धगतेरुपादानकारणं भव्यानां भवति तथा निदानरहितपरिणामोपार्जिततीर्थंकरप्रकृत्युत्तमसंहननादिविशिष्टपुण्यरूपधर्मोऽपि सहकारिकारणं भवति, तथा यद्यपि जीवपुद्गलानां गतिपरिणतेः स्वकीयोपादानकारणमस्ति तथापि धर्मास्तिकायोऽपि सहकारिकारणं भवति । अथवा भव्यानामभव्यानां वा यथा चतुर्गतिगमनकाले यद्यप्यभ्यन्तरशुभाशुभपरिणाम उपादानकारणं भवति तथापि द्रव्यलिङ्गादि दानपूजादिकं वा बहिरङ्गशुभानुष्ठानं च बहिरङ्गसहकारिकारणं भवति तथा जीवपुद्गलानां यद्यपि स्वयमेव निश्चयेनाभ्यन्तरेऽन्तरङ्गसामर्थ्यमस्ति तथापि व्यवहारेण धर्मास्तिकायोऽपि गतिकारणं भवतीति भावार्थः ॥ ८५ ॥ एवं प्रथमस्थले धर्मास्तिकायव्याख्यानमुख्यत्वेन गाथात्रयं गतं । अथाधर्मास्तिकायस्वरूपं कथ्यते,—यथा भवति धर्मद्रव्यं तथार्थं कर्तुं जानीहि हे शिष्य

रूपो निमित्तमात्रसहाय [भवति] होता है [तथा] वैसें ही [जीवपुद्गलानां] जीव और पुद्गलोंके गमनको सहाय [धर्मद्रव्यं] धर्म नामा द्रव्य [विजानीहि] जानना । भावार्थ—जैसें जल मच्छियोंके गमन करते समय न तो आप उनके साथ चलता है और न मच्छियोंको चलावे है किंतु उनके गमनको निमित्तमात्र सहायक है, ऐसा ही कोई एक स्वभाव है । मच्छियां जो जलके विना चलनेमें असमर्थ हैं इस कारण जल निमित्तमात्र है । इसी प्रकार ही जीव और पुद्गल धर्मद्रव्यके विना गमन करनेको असमर्थ हैं जीव पुद्गलके चलते धर्मद्रव्य आप नहीं चलता और न इनको प्रेरणा करके [illegible] है आप तो उदासीन है परन्तु कोई एक [illegible] ही अनादि निधन स्वभाव है कि जीव पुद्गल गमन करें तो उनको निमित्तमात्र सहायक होता है । ८५ ॥ आगे अधर्मद्रव्यका स्वरूप दिखाया जाता है—[यथा] जै[से] [तत्] जिसका स्वरूप पहिले कह आये हैं [धर्मद्रव्यं] ध[र्म]द्रव्य [भवति] होता है [तथा]

१ अ[illegible]

जातमलोकलोकं ययोः सद्भावतश्च गमनस्थिती ।
द्वावपि च मतौ विभक्तावविभक्तौ लोकमात्रौ च ॥ ८७ ॥

धर्माधर्मौ विद्येते । लोकालोकविभागान्यथानुपपत्ते । जीवादिसर्वपदार्थानामेकत्र वृत्ति
...पो लोकः । शुद्धैकाकाशवृत्तिरूपोऽलोकः । तत्र जीवपुद्गलौ स्वरसत एव गतितत्पूर्व
...स्थितिपरिणामापन्नौ । तयोर्यदि गतिपरिणामं तत्पूर्वस्थितिपरिणामं वा स्वयमनुभवतोर्बहि
...रङ्गहेतू धर्माधर्मौ न भवेताम्, तदा तयोर्निरर्गलगतिस्थितिपरिणामत्वादलोकेऽपि वृत्तिः
केन वार्येत । ततो न लोकालोकविभागः सिध्येत । धर्माधर्मयोस्तु जीवपुद्गलयोर्गतितत्पू
र्वस्थित्योर्बहिरङ्गहेतुत्वेन सद्भावेऽभ्युपगम्यमाने लोकालोकविभागो जायत इति । किञ्च
धर्माधर्मौ द्वावपि परस्परं पृथग्भूतास्तित्वनिर्वृत्तत्वाद्विभक्तौ । एकक्षेत्रावगाढत्वादविभक्तौ ।

धम्माजात । जेसिं सब्भावदो य ययोर्धर्माधर्मयोः स्वभावतश्च । न केवलं लोकालोकद्वयं जातं ।
गमणठिदी गतिस्थितिनिश्चितौ द्वौ । कथंभूतौ । दोवि य मया द्वौ धर्माधर्मौ मतौ सम्मतौ स्तः
अथवा पाठांतरं "अमया" अमयौ न केनापि कृतौ विभत्ता विभक्तौ भिन्नौ अविभत्ता
अविभक्तौ लोयमेत्ता य लोकमात्रौ चेति । तद्यथा—धर्माधर्मौ विद्येते लोकालोकसद्भावात् षड्द्रव्य
समूहात्मको लोकः तस्माद्बहिर्भूतं शुद्धाकाशमलोकः, तत्र लोके गतिं तत्पूर्वकस्थितिमास्कन्दतो
र्जीवपुद्गलयोर्यदि बहिरङ्गहेतुभूतधर्माधर्मौ न स्यातां तदा लोकाद्बहिर्भूतबाह्यभागेऽपि
गतिं केन नाम निषिध्यते न केनापि ततो लोकालोकविभागादेव ज्ञायते धर्माधर्मौ विद्येते ।

समाधान करनेकेलिये आचार्य कहते हैं;—[ययो] जिन धर्माधर्म द्रव्यके [सद्भावत] अस्तित्व होनेसे [अलोकलोक] लोक और अलोक [जात] हुआ है [च] और जिनसे [गमनस्थिती] गति स्थिति होती है वे [द्वौ अपि] दोनों ही [विभक्तौ मतौ] अपने अपने स्वरूपसे जुदे जुदे कहे गये हैं किंतु [अविभक्तौ] एकक्षेत्र अवगाहसे जुदे २ नहीं है । [च] और [लोकमात्रौ] असंख्यातप्रदेशी लोकमात्र हैं । **भावार्थ**—यहां जो प्रश्न किया था कि—धर्म अधर्म द्रव्य है ही नहीं—आकाश ही गति स्थितिको सहायक है तिसका समाधान इस प्रकार हुआ कि—धर्म अधर्म द्रव्य अवश्य हैं । जो ये दोनों नहीं होते तो लोक अलोकका भेद नहीं होता । लोक उसको कहते हैं जहां कि जीवादिक समस्त पदार्थ हों जहां एक आकाश ही है सो अलोक है, इस कारण जीव पुद्गलकी गतिस्थिति लोकाकाशमें है अलोकाकाशमें नहीं है । जो इन धर्म अधर्मके गतिस्थिति निमित्तका गुण नहीं होता तो लोक अलोकका भेद दूर हो जाता । जीव और पुद्गल ये दोनों ही द्रव्य गति स्थिति अवस्थाको धरते हैं इनकी गति स्थितिको बहिरंग कारण धर्म अधर्म द्रव्य लोकमें ही

---

१ समाधान २ जीवपुद्गलयोः ३ अङ्गीक्रियमाणे सति ।

निष्क्रियत्वेन सकललोकवर्तिनोर्जीवपुद्गलयोर्गतिस्थित्युपग्रहणकरणाल्लोकमात्राविति ॥८७॥

धर्माधर्मयोर्गतिस्थितिहेतुत्वेऽप्यत्यन्तौदासीन्याख्यापनमेतत्,—

ण य गच्छदि धम्मत्थी गमणं ण करेदि अण्णदवियस्स ।
हवदि गती स प्पसरो जीवाणं पुग्गलाणं च ॥ ८८ ॥

न च गच्छति धर्मास्तिको गमनं न करोत्यन्यद्रव्यस्य ।
भवति गतेः स प्रसरो जीवानां पुद्गलानां च ॥ ८८ ॥

यथा हि गतिपरिणतः प्रभञ्जनो वैजयन्तीनां गतिपरिणामस्य हेतुकर्त्तावलोक्यते न तथा धर्मः । स खलु निष्क्रियत्वात् न कदाचिदपि गतिपरिणाममेवापद्यते । कुतोऽस्य सहकारित्वेन परेषां गतिपरिणामस्य हेतुकर्तृत्वं । किंतु सलिलमिव मत्स्यानां जीवपुद्गलानामाश्रयकारणमात्रत्वेनोदासीन एवाऽसौ गतेः प्रसरो भवति । अपि च यथा गतिपूर्व

ता च किंविशिष्टौ । भिन्नास्तित्वनिष्पन्नत्वान्निश्चयनयेन पृथग्भूतौ एकक्षेत्रावगाहत्वादसद्भूतव्यवहारनयेन सिद्धराशिवदभिन्नौ सर्वदैव निःक्रियत्वेन लोकव्यापकत्वाल्लोकमात्राविति सूत्रार्थः ॥८७॥ अथ धर्माधर्मौ गतिस्थितिहेतुत्वविषयेऽत्यन्तोदासीनाविति निश्चिनोति,—**ण य गच्छदि** नैव गच्छति । स कः । **धम्मत्थी** धर्मास्तिकायः **गमणं ण करेदि** **अण्णदवियस्स** गमनं न करोत्यन्यद्रव्यस्य **हवदि** तथापि भवति । स कः । **पसरो** प्रसरः प्रवृत्तिः । कस्याः । **गदिस्स य** गतेश्च । केषां गतेः । **जीवाणं पोग्गलाणं च** जीवानां पुद्गलानां चेति ।

है । जो ये धर्म अधर्म द्रव्य लोकमें नहीं होवे तो लोक अलोक ऐसा भेद ही नहीं होता सब जगहँ ही लोक होता । इस कारण धर्म अधर्म द्रव्य अवश्य हैं । जहांतक जीवपुद्गल गति स्थितिको करते हैं तहां तांई लोक है उससे परे अलोक जानना—इसी न्याय पर लोक अलोकका भेद धर्म अधर्म द्रव्यसे जानना । ये धर्म अधर्म द्रव्य दोनों ही अपने २ प्रदेशोंको लियेहुये जुदे जुदे हैं एक लोकाकाश क्षेत्रकी अपेक्षा जुदे जुदे नहीं हैं क्योंकि लोकाकाशके जिन प्रदेशोंमें धर्मद्रव्य है उन ही प्रदेशोंमें अधर्मद्रव्य भी है दोनों ही हिलनचलनरूप क्रियासे रहित सर्वलोकव्यापी हैं । समस्त लोकव्यापी जीव पुद्गलोंको गतिस्थितिको सहकारी कारण हैं इसकारण दोनों ही द्रव्य लोकमात्र असंख्यातप्रदेशी हैं ॥ ८७ ॥ आगे धर्म अधर्म द्रव्य प्रेरक होकर गति स्थितिको कारण नहीं है अत्यंत उदासीन हैं ऐसा कथन करनेको गाथा कहते हैं, **[धर्मास्तिकः]** धर्मास्तिकाय **[न]** नहीं **[गच्छति]** चलता हिलता है । **[च]** और **[अन्यद्रव्यस्य]** अन्य जीव पुद्गलका प्रेरक होयकर **[गमनं]** हलन चलन क्रियाको **[न]** नहीं **[करोति]** करता है **[सः]** वह धर्मद्रव्य **[जीवानां]** जीवोंकी और **[पुद्गलानां]** पुद्गलोंकी **[गतेः]** हलन चलन क्रियाका **[प्रसरः]**

१ वायुः २ पताकानाम् ३ धर्मद्रव्यस्य ४ प्रवर्तको भवति । न प्रेरकतया ज्ञेयः ।

स्थितिपरिणतस्तुरङ्गोऽश्ववारस्य स्थितिपरिणामस्य हेतुकर्त्ताऽवलोक्यते न तथा धर्मं । स खलु निष्क्रियत्वात् न कदाचिदपि गतिपूर्वस्थितिपरिणाममेवापद्यते । कुतोऽस्य सहस्थायित्वेन परेषां गतिपूर्वस्थितिपरिणामस्य हेतुकर्तृत्वं । किंतु पृथिवीवत्तुरङ्गस्य जीवपुद्गलानामाश्रयकारणमात्रत्वेनोदासीन एवाऽसौ गतिपूर्वस्थिते प्रसरो भवतीति ॥ ८८ ॥

तथाहि—यथा तुरंगम स्वयं गच्छन् स्वकीयारोहकस्य गमनहेतुर्भवति न तथा धर्मास्तिकाय । कस्मात् । निष्क्रियत्वात् किंतु यथा जलं स्वयं तिष्ठति सति वा तिष्ठत्मत्स्यस्य गच्छतां मत्स्यानामौदासीन्येन गतेर्निमित्तं भवति तथा धर्मोऽपि स्वयं तिष्ठन्सन् स्वकीयोपादानकारणेन गच्छतां जीवपुद्गलानामप्रेरकत्वेन बहिरंगनिमित्तं भवति । यद्यपि धर्मास्तिकायो य उदासीनो जीवपुद्गल गतिविषये तथापि जीवपुद्गलानां स्वकीयोपादानबलेन जले मत्स्यानामिव गतिहेतुर्भवति, अधर्मस्तु पुनः स्वयं तिष्ठतामश्वादीनां पृथिवीवत्पथिकानां छायावद्वा स्थितेर्बहिरंगहेतुर्भवतीति

प्रवर्तक [भवति] होता है । [च] फिर इसप्रकारही अधर्मद्रव्य भी स्थितिको निमित्तमात्र कारण जानना । **भावार्थ**—जैसें पवन अपने चचलस्वभावसे ध्वजाओंकी हलन चलन क्रियाका कर्त्ता देखनेमें आता है वैसें धर्मद्रव्य नहीं है । धर्मद्रव्य जो है सो आप हलनचलनरूप क्रियासे रहित है किसी कालमें भी आप गति परणतिको (गमनक्रियाको) नहीं धारता । इसकारण जीवपुद्गलकी गतिपरणतिका सहायक किस प्रकार होता है उसका दृष्टांत देते हैं जैसे कि नि कम्प सरोवरमें 'जल' मच्छियोंकी गतिको सहकारी कारण है—जल स्वयं प्रेरक होकर मच्छियोंको नहीं चलाता, मच्छियें अपने ही गति परिणामके उपादान कारणसे चलतीं हैं परंतु जलके विना नहीं चल सक्ती, जल उनको निमित्तमात्र कारण है । उसी प्रकार जीवपुद्गलोंकी गति अपने उपादान कारणसे है धर्मद्रव्य आप चलता नहीं किंतु अन्य जीवपुद्गलोंकी गतिकेलिये निमित्त मात्र होता है । इसीप्रकार अधर्मद्रव्य भी निमित्तमात्र है। जैसें घोडा प्रथम ही गति क्रियाको करके फिर स्थिर होता है असवारकी स्थितिका कर्त्ता देखिये है, उसी प्रकार अधर्मद्रव्य प्रथम आप चलकर जीवपुद्गलकी स्थिरक्रियाका आप कर्त्ता नहीं है किंतु आप निःक्रिय है इसकारण गतिपूर्वस्थिति परणाम अवस्थाको प्राप्त नहीं होता है । यदि परद्रव्यकी क्रियासे इसकी गति पूर्वक्रिया नहीं होती तो किसप्रकार स्थिति क्रियाका सहकारी कारण होता है? जैसें घोडेकी स्थिति क्रियाका निमित्त कारण भूमि (पृथिवी) होती है । भूमि चलती नहीं परंतु गतिक्रियाके करनेहारे घोडेकी स्थितिक्रियाको सहकारिणी है उसीप्रकार अधर्मद्रव्य जीवपुद्गलकी स्थितिको उदासीन अवस्थासे स्थितिक्रियाका सहायी है ॥ ८८ ॥ आगें धर्म अधर्म

१ अधर्मद्रव्यस्य २ सहचलनरूपेण ।

मता पदार्थानां गतिस्थिती भवत इति चेत्, सर्वे हि गतिस्थितिमंत पदार्था स्वपरिणा मैरेव निश्चयेन गतिस्थिती कुर्वंतीति ॥ ८९ ॥ इति धर्माधर्मद्रव्यास्तिकायव्याख्यानं समाप्तम् । अथाकाशद्रव्यास्तिकायव्याख्यानम् ।

आकाशस्वरूपाख्यानमेतत्,—

सव्वेसिं जीवाणं सेसाणं तह य पुग्गलाणं च ।
जं देदि विवरमखिलं तं लोए हवदि आयासं ॥ ९० ॥

सर्वेषां जीवानां शेषाणां तथैव पुद्गलानां च ।
यद्ददाति विवरमखिलं तल्लोके भवत्याकाशं ॥ ९० ॥

स्थिती इति चेत् ? तत्रोत्तरं सर्वे पदार्थाः स्वपरिणामैरेव गतिं स्थितिं च कुर्वंतीति । अत्र सूत्रे निर्विकारचिदानंदैकस्वभावशुद्धात्मस्वभावात् शुद्धात्मतत्त्वाद्भिन्नत्वाद्धेयतत्त्वमित्यभिप्रायः ॥ ८९ ॥ एवं धर्माधर्मोभयव्यवस्थापनमुख्यत्वेन तृतीयस्थले गाथात्रयं गतं । इति गाथासप्तकपर्यंतं स्थलत्रयेण पंचास्तिकायषड्द्रव्यप्रतिपादकप्रथममहाधिकारमध्ये धर्माधर्मव्याख्यानरूपेण पंचमांतराधिकारः समाप्तः । अथानंतरं शुद्धबुद्धैकस्वभावनिश्चयमोक्षकारणभूतात्मस्वरूपरोपादेयरूपात् शुद्धजीवास्तिकायात्सकाशाद्भिन्न आकाशास्तिकाय सप्तगाथापर्यंतं कथ्यते । तत्र गाथासप्तकमध्ये प्रथमतस्तावत् लोकाकाशालोकाकाशद्वयस्वरूपकथनमुख्यत्वेन "सव्वेसिं जीवाणं" इत्यादि गाथाद्वयं, अथ आकाशमेव गतिस्थितिद्वयं करिष्यति धर्माधर्माभ्यां किं प्रयोजनमिति पूर्वपक्षनिराकरणमुख्यत्वेन "आगासं अवगासं" इत्यादि पाठक्रमेण गाथाचतुष्टयं, तदनंतरं धर्माधर्मलोकाकाशानामेकक्षेत्रावगाहत्वात्समानपरिमाणत्वाच्चासद्भूतव्यवहारेणैकत्वं भिन्नलक्षणत्वान्निश्चयेन पृथक्त्वमिति प्रतिपादनमुख्यत्वेन "धम्माधम्मागासा" इत्यादि सूत्रमेकं । एवं सप्तगाथाभिः स्थलत्रयेणाकाशास्तिकायव्याख्याने समुदायपातनिका । तद्यथा । आकाशस्वरूपं कथयति;—सव्वेसिं जीवाणं सर्वेषां जीवानां सेसाणं तह य शेषाणां तथैव च धर्माधर्मकालानां पोग्गलाणं च पुद्गलानां च जं देदि यत् ददाति । किं । विवरं विवरं छिद्रं अवकाशमवगाहं अखिलं समस्तं तं तत्कथितं लोए लोके हवदि आयासं आकाशं भवति । अत्राह शिवकुमारमहाराजनामा ।

[कुर्वन्ति] करते हैं । इसकारण यह बात सिद्ध हुई कि धर्म अधर्म द्रव्य मुख्य कारण नहिं हैं व्यवहार नयकरि अपना स्वभाव अवस्था निमित्तकारण हैं । निश्चय करके जीव पुद्गलोंकी गति स्थितिका उपादानकारण अपना ही परिणाम है ॥ ८९ ॥

यह धर्मअधर्मास्तिकायका व्याख्यान पूर्ण हुआ । आगे आकाशास्तिकायका व्याख्यान किया जाता है [सर्वेषां] समस्त [जीवानां] जीवोंको [तथैव] तैसे ही [शेषाणां] धर्म अधर्म काल इन बाकी के द्रव्योंको [च] और [पुद्गलानां] पुद्गलोंको [यत्] जो [अखिलं] समस्त [विवरं] जगहको [ददाति] देता है [तत्] वह [लोके] इस लोकमें [आकाशं] आकाश

षड्द्रव्यात्मके लोके सर्वेषां शेषद्रव्याणां समस्तावकाशनिमित्तं विशुद्धक्षेत्ररूपं तदाकाशमिति ॥ ९० ॥

लोकाद्बहिराकाशसूचनेयम्;—

जीवा पुग्गलकाया धम्माधम्मा य लोगदोणण्णा ।
तत्तो अणण्णमण्णं आयासं अंतवदिरित्तं ॥ ९१ ॥

जीवाः पुद्गलकायाः धर्माधर्मौ च लोकतोऽनन्ये ।
ततोऽनन्यदन्यदाकाशमन्तव्यतिरिक्तम् ॥ ९१ ॥

हे भगवन् लोकस्यासंख्यातप्रदेशत्वे तत्र लोके [illegible] अनन्तज्ञानमनन्तानन्त [illegible] अनन्तानन्तजीवास्तेभ्योऽप्यनन्तगुणाः पुद्गलाः लोकाकाशप्रमितप्रदेशप्रमाणाः कालाणवो धर्माधर्मौ चेति सर्वे कथमवकाशं लभन्त इति । भगवानाह । एकापवरके अनेकप्रदीपप्रकाशवदेकगूढनागरसगद्याणके बहुसुवर्णवदेकस्मिन्नुष्ट्रीक्षीरघटे मधुघटवदेकस्मिन् भूमिगृहे जयघण्टादिशब्दवद्विशिष्टावगाहगुणेनासंख्येयप्रदेशेऽपि लोके अवकाशलाभो भवति जीवादयोऽनन्ता इति भावः इत्यभिप्रायः ॥९०॥ अथ पञ्चद्रव्यसमवायो लोकस्तस्माद्बहिरनन्तमाकाशमलोक इति प्रकटयति;—जीवा जीवाः पुद्गलकायाः धर्माधर्मद्वयं चकाराकालश्च । एते सर्वे कथंभूता । लोगदो अणण्णा लोकाकाशादनन्ये तत्तो तस्माल्लोकाकाशात् अणण्णमण्णं आयासं अनन्यदन्यच्चाकाशं यदन्यद् लोकाकाशं । तत्किं प्रमाणं । अंतवदिरित्तं अन्तव्यतिरिक्तमनन्तमिति । अत्र सूत्रे यद्यपि सामान्येन पदार्थानां लोकादनन्यत्वं भणितं तथापि निश्चयेन मूर्तिरहितत्वकेवलज्ञानत्वसहजपरमानन्दत्वनित्य

[भवति] होता है । भावार्थ—इस लोकमें पाच द्रव्योंको जो अवकाश देता है उसको आकाश कहते हैं ॥९०॥ आगें लोकसे बाहर अलोकाकाश है उसका स्वरूप कहते हैं—[जीवाः] अनत जीव [पुद्गलकायाः] अनत पुद्गलपिंड [च] और [धर्माधर्मौ] धर्मद्रव्य और अधर्म द्रव्य [लोकतः अनन्ये] लोकसे बाहर नाहीं । ये पाच द्रव्य लोकाकाशमें हैं [ततः] तिस लोकाकाशसे [अन्यत्] जो और है [अनन्यत्] और नहीं भी है ऐसा [आकाशं] आकाशद्रव्य है सो [अतव्यतिरिक्तं] अनत है । भावार्थ—आकाश लोक अलोकके भेदसे दो प्रकारका है । लोकाकाश उसे कहते हैं जो जीवादि पाच द्रव्याकर सहित है । और अलोकाकाश वह है जहापर आप एक आकाश ही है । वह अलोकाकाश एक द्रव्यकी अपेक्षा लोकसे जुदा नहीं है और वह अलोकाकाश पाचद्रव्यसे रहित है जब यह अपेक्षा लीजाय तब जुदा है । अलोकाकाश अनतप्रदेशी है लोकाकाश असख्यात प्रदेशी है । यहा कोई प्रश्न करै कि लोकाकाशका क्षेत्र किंचिन्मात्र है । उसमें अनत

---

१ पञ्चद्रव्याणाम् ।

जीवादीनि शेषद्रव्याण्यवधृतपरिमाणत्वाल्लोकादनन्यान्येव । आकाशं त्वनन्तत्वाल्लोकादनन्यदन्यच्चेति ॥ ९१ ॥

आकाशस्यावकाशैकहेतोर्गतिस्थितिहेतुत्वशङ्कायां दोषोपन्यासोऽयम्,—

आयासं अवगासं गमणट्ठिदिकारणेहिं देदि जदि ।
उड्ढंगदिप्पधाणा सिद्धा चिट्ठंति किध तत्थ ॥ ९२ ॥

आकाशमवकाशं गमनस्थितिकारणाभ्यां ददाति यदि ।
ऊर्ध्वगतिप्रधानाः सिद्धाः तिष्ठन्ति कथं तत्र ॥ ९२ ॥

यदि खल्वाकाशमवगाहिनामवगाहहेतुरिव गतिस्थितिमतां गतिस्थितिहेतुरपि स्यात्, तदा

मन पुष्पको समान परद्रव्यमें ममत्वभाव करता है मोक्षके सुखसे पराङ्मुख है ऐसा जो ससारी जीव है उसका जो स्वाभाविक भावसे विचार किया जाय तो निर्मल चैतन्यविलासी आत्माराम है ॥१२१॥ आगें अन्य अचेतनद्रव्योंमें न पायी जाय ऐसी कौन २ करतूत है एसा कथन करते हैं,—[जीव] आत्मा [सर्वं] समस्त ही [जानाति] जानता है [पश्यति] सबको देखता है [सौख्य] सुखको [इच्छति] चाहता है और [दुःखात्] दुःखसे [बिभेति] डरता है [हित] शुभाचारको [वा] अथवा [अहित] अशुभाचारको [करोति] करता है और [तयो] उन शुभ अशुभ क्रियाओंके [फल] फलको [भुङ्क्ते] भोगता है । भावार्थ—ज्ञानदर्शनक्रियाका कर्ता जीव ही है जीवका चैतन्यस्वभाव है इस कारण यह ज्ञानदर्शक्रियासे तन्मय है उसहीका सबधी जो यह पुद्गल है सो चैतन्य क्रियाका कर्ता नहीं है जैसें आकाशादि चारि अचेतनद्रव्यभी कर्त्ता नहीं है । सुखकी अभिलाषा दुःखसे डरना शुभाशुभ प्रवर्तन इत्यादि क्रियाओंमें सकल्पविकल्पका कर्ता जीव ही है । इष्ट अनिष्ट

१ इन्द्रियकायेषु २ कथभूताया क्रियाया कर्तृस्थाया । कर्तरि तिष्ठति इति कर्तृस्था तस्या कर्तृस्थाया ३ अनादिकर्मबंधत्वात् तत्संबध जीवसंबध पुद्गल कथ्यते । स पुद्गलो ज्ञप्तिक्रियायाश्च कर्ता दृशिक्रियायाश्च नेति तात्पर्यम् ।

याश्च चैतन्यविवर्तनरूपसंकल्पप्रभवास्ता स एव कर्ता नान्य । शुभाशुभकर्मकलभूताया इष्टानिष्टविषयोपभोगक्रियायाश्च सुखदुःखस्वरूपस्वपरिणामक्रियाया इव स एव कर्ता नान्य । एतेनासाधारणकार्यानुमेयत्व पुद्गलव्यतिरिक्तस्यात्मनो द्योतितमिति ॥ १२२ ॥

जीवाजीवव्याख्योपसहारोपक्षेपसूचनेयम्,—

एवमभिगम्म जीवं अण्णेहिं वि पज्जएहिं बहुगेहिं ॥
अभिगच्छदु अज्जीवं णाणंतरिदेहिं लिंगेहिं ॥ १२३ ॥

एवमभिगम्य जीवमन्यैरपि पर्यायैर्बहुकै ।
अभिगच्छत्वजीव ज्ञानांतरितैर्लिङ्गै ॥ १२३ ॥

एवमनया दिशा व्यवहारनयेन कर्मग्रन्थप्रतिपादितजीवगुणमार्गणास्थानादिप्रपञ्चित विचित्रविकल्परूपै , निश्चयनयेन मोहरागद्वेषपरिणतिसंपादितविश्वरूपत्वात्कदाचिदशुद्धै

याश्च स एव सुखदुःखफलानुभवनरूपाया भोक्तृक्रियायाश्च स एव कर्ता भवतीत्यसाधारणकार्येण जीवास्तित्व ज्ञातव्य । तच्च कर्तृत्वमशुभशुभशुद्धोपयोगरूपेण त्रिधा भिद्यते, अथवानुपचरितासद्भूतव्यवहारेण द्रव्यकर्मकर्तृत्व तथैवाशुद्धनिश्चयेन रागादिविकल्परूपभावकर्मकर्तृत्व शुद्धनिश्चयेन तु केवलज्ञानादिशुद्धभावाना परिणमनरूप कर्तृत्व नयत्रयेण भोक्तृत्वमपि तथैवेति सूत्रतात्पर्य ॥ तथा चोक्त । "पुग्गलकम्मादीण कत्ता ववहारदो दु णिच्छयदो । चेदणकम्माणादा सुद्धणया सुद्धभावाण" ॥ १२२ ॥ एव भेदभावनामुख्यत्वेन प्रथमगाथा जीवस्यासाधारणकार्यकथनरूपेण द्वितीया चेति स्वतन्त्रगाथाद्वयेन पचमस्थल गत । अथ गाथापूर्वार्धेन जीवाधिकारव्याख्यानोपसहारमुत्तरार्धेन चाजीवाधिकारप्रारभ करोति,—एवमभिगम्य ज्ञात्वा । क । जीव अन्यैरपि पर्यायैर्बहुकै पश्चादभिगच्छतु जानातु । क । अजीव ज्ञानांतरितैर्लिङ्गैरिति ।

पदार्थोंकी भोगक्रियाका, अपने सुखदुःखरूप परिणामक्रियाका कर्त्ता एक जीव पदार्थको ही जानना इनका कर्त्ता और कोई नहीं है । ये जो क्रियायें कहीं हैं वे सब शुद्ध अशुद्ध चैतन्यभावमयी हैं इसकारण ये क्रियायें पुद्गलकी नहीं हैं आत्माकी ही हैं ॥ ॥ १२२ ॥ आगें जीवअजीवका व्याख्यान सक्षेपतासे दिखाते है,-[एव] इसप्रकार [अन्यै अपि] अन्य भी [बहुकै पर्यायै] अनेक पर्यायोंसे [जीव] आत्माको [अभिगम्य] जानकरके [ज्ञानांतरितैर्लिङ्गै] ज्ञानसे भिन्न स्पर्शरसगधवर्णादिचिन्होंसे [अजीव] पुद्गलादिक पाच अजीव द्रव्योंको [अभिगच्छतु] जानो । भावार्थ—जैसें पूर्वमें जीवकी करतूतें दिखाई वैसें ही व्यवहारनयसे कर्मपद्धतिके विचारमें जीवसमास गुणस्थान मार्गणास्थान इत्यादि अनेकप्रकार पर्यायविलासकी विचित्रतामें जीवपदार्थ जान लेना । और अशुद्ध निश्चयनयसे कदाचित् मोहरागद्वेषपरिणतिसे

१ पर्यायरूपै २ जीव ३ इतरस्थोऽयं कियाया कर्ता न स्यादित्यनेन ४ गोमटसारादिकर्मग्रन्थाः सन्ति विर्धत एव वा अन्या अपि कर्मपद्धतय सन्त्येव त प्रतिपादित ।

कदाचित्तदभावाच्छुद्धैश्चैतन्यविवर्तग्रन्थिरूपैर्बहुभि पर्य्यायै जीवमधिगच्छेत् । अधिगम्य चैवमचैतन्यस्वभावत्वात् ज्ञानादर्थान्तरभूतैरितैः प्रपद्यमानैर्लिङ्गैर्जीवसंबद्धमसंबद्धं वा स्वतो भेदबुद्धिप्रसिद्ध्यर्थमजीवमधिगच्छेदिति॥१२३॥इति जीवपदार्थव्याख्यानं समाप्तम्।

अथाजीवपदार्थव्याख्यानम् । आकाशादीनामेवाजीवत्वे हेतूपन्यासोऽयम्,—

आगासकालपुग्गलधम्माधम्मेसु णत्थि जीवगुणा ।
तेसिं अचेदणत्तं भणिदं जीवस्स चेदणदा ॥ १२४ ॥

आकाशकालपुद्गलधर्माधर्मेषु न सन्ति जीवगुणा ।
तेषामचेतनत्वं भणितं जीवस्य चेतनता ॥ १२४ ॥

आकाशकालपुद्गलधर्माधर्मेषु चैतन्यविशेषरूपा जीवगुणा नो विद्यते । आकाशादीना

तद्यथा—एवं पूर्वोक्तप्रकारेण जीवपदार्थमधिगम्य । कै । पर्यायै । कथंभूतै । पूर्वोक्त न केवल पूर्वोक्तै व्यवहारेण गुणस्थानमार्गणास्थानभेदगतनामकर्मोदयादिजनितस्वकीयस्वकीयमनुष्यादिशरीरसंस्थानसंहननप्रभृतिबहिरङ्गाकारैर्निश्चयनयाभ्यन्तरे रागद्वेषमोहरूपैरशुद्धैरन्यैश्च वीतरागनिर्विकल्पचिदानन्दैकस्वभावात्मपदार्थसंवित्तिसंजातपरमानन्दसुखस्थितसुखामृतरसानुभवनसमरसीभावपरिणतमनोरूपैः शुद्धध्यानैश्चेति । पश्चात् किं करोतु । जानातु । कं । अजीवं पदार्थं । कैः । लिंगैः चिह्नैः । किंविशिष्टैरपि वक्ष्यमाणैर्ज्ञानातिरिक्तत्वात् जडैश्चेति सूत्राभिप्राय ॥ ॥ १२३ ॥ एवं जीवपदार्थव्याख्यानोपसंहार तथैवाजीवव्याख्यानप्रारंभ इत्येकसूत्रेण पष्ठस्थलं गतं । इति पूर्वोक्तप्रकारेण "जीवाजीवा भावा" इत्यादि नवपदार्थानां नामकथनरूपं स्वतन्त्रगाथासूत्रमेकं, तदनन्तरं जीवादिपदार्थव्याख्यानेन षट्स्थलैः पंचदशसूत्राणि समुदा

उत्पन्न अनेकप्रकार अशुद्ध पर्यायोंसे जीव पदार्थ जाना जाता है । और कदाचित् मोह जनित अशुद्ध परणतिके विनाश होनेसे शुद्ध चेतनामयी अनेक पर्यायोंसे जीव पदार्थ जाना जाता है—इत्यादि अनेक भगवत्प्रणीत आगमके अनुसार नयविलाससे जीव पदार्थको जानो और अजीवपदार्थोंका स्वरूप जानो सो अजीवद्रव्य जडस्वभावोंकेद्वारा जाने जाते हैं अर्थात् ज्ञानसे भिन्न अन्य स्पर्शरसगंधवर्णादिक चिह्नोंसे जीवसे बंधहुये कर्म नोकर्मादिरूप तथा नहीं बंधेहुये परमाणु आदिक सब ही अजीव हैं । जीव अजीव पदार्थोंका इसप्रकार भेद जो किया जाता है सो एकमात्र भेदविज्ञानकी सिद्धिके निमित्त है । इसप्रकार यह जीवपदार्थका व्याख्यान पूर्ण हुआ ॥ १२३ ॥ आगे अजीवपदार्थका व्याख्यान किया जाता है—[आकाशकालपुद्गलधर्माधर्मेषु] आकाशद्रव्य कालद्रव्य पुद्गलद्रव्य धर्मद्रव्य अधर्मद्रव्य इन पांचों द्रव्योंमें [जीवगुणा] गुणसमस्त बोध चेतना आदि जीवके गुण [न] नहीं [सन्ति] हैं [यतः] इन

१ तथा च जीवाजीवानाम्ब २ १२१ पर्व के समय

तेषामचेतनत्वसामान्यत्वात् । अचेतनत्वसामान्यञ्चाकाशादीनामेव । चेतनता जीवस्यैव । चेतनत्वसामान्यादिति ॥ १२४ ॥

आकाशादीनामचेतनत्वसामान्ये पुनरनुमानमेतत्,—

सुहदुक्खजाणणा वा हिदपरियम्मं च अहिदभीरुत्तं ।
जस्स ण विज्जदि णिच्चं तं समणा विंति अज्जीवं ॥ १२५ ॥

सुखदुःखज्ञानं वा हितपरिकर्म चाहितभीरुत्वं ।
यस्य न विद्यते नित्यं तं श्रमणा विंदत्यजीवं ॥ १२५ ॥

येन षोडशगाथाभिर्नवपदार्थप्रतिपादकद्वितीयमहाधिकारमध्ये "द्वितीयांतराधिकार" समाप्त । अथ भावकर्मद्रव्यकर्मनोकर्ममतिज्ञानादिविभावगुणनरनारकादिविभावपर्यायरहितं केवलज्ञानाद्यनंतगुणस्वरूपो जीवादिनवपदार्थांतर्गतो भूतार्थपरमार्थरूपः शुद्धसमयसाराभिधान उपादेयभूतो योऽसौ शुद्धजीवपदार्थस्तस्मात्सकाशाद्विलक्षणस्वरूपस्याजीवपदार्थस्य गाथाचतुष्टयेन व्याख्यानं क्रियते । तत्र गाथाचतुष्टयमध्ये अजीवत्वप्रतिपादनमुख्यत्वेन "आयासकाल" इत्यादि पाठक्रमेण गाथात्रयं, तदनंतरं भेदभावनार्थं देहगतशुद्धजीवप्रतिपादनमुख्यत्वेन "अरसमरूव" इत्यादि सूत्रमेकं, एवं गाथाचतुष्टयपर्यंतं स्थलद्वयेनाजीवाधिकारव्याख्याने समुदायपातनिका । तद्यथा । अथाकाशादीनामजीवत्वे कारणं प्रतिपादयति;—आकाशकालपुद्गलधर्माधर्मेष्वनंतज्ञानदर्शनादयो जीवगुणाः संति न ततः कारणात्तेषामजीवत्वं भणितं । कस्मात् तेषां जीवगुणा न संतीतिचेत् । युगपज्जगत्त्रयकालत्रयवर्तिसमस्तपदार्थपरिच्छेदकत्वेन जीवस्यैव चेतकत्वादिति सूत्राभिप्रायः ॥ १२४ ॥ अथाकाशादीनामेवाचेतनत्वे साध्ये पुनरपि कारणं कथयामीत्यभिप्रायं मनसि धृत्वा सूत्रमिदं प्रतिपादयति;—सुखदुःखज्ञातृता वा हितपरिकर्म च तथैवाहितभीरुत्वं यस्य पदार्थस्य न विद्यते नित्यं तं श्रमणा ब्रुवंत्यजीवमिति । तदेव कथ्यते । अज्ञानिनां हितं स्रग्वनिताचंदनादि तत्कारणं दानपूजादि, अहितमहिविषकंटकादि । संज्ञानिनां पुनरक्षयानंतसुखं तत्कारणभूतं निश्चयरत्नत्रयपरिणतं परमात्मद्रव्यं च हितमहितं पुनराकुलत्वोत्पादकं दुःखं तत्कार

आकाशादि पांच द्रव्योंके [अचेतनत्वं] चेतनारहित जड़भाव [भणितं] वीतराग भगवानने कहा है [चेतनता] चैतन्यभाव [जीवस्य] जीवद्रव्यके ही कहा गया है । भावार्थ—आकाशादि पांच द्रव्य अचेतन जानने क्योंकि इनमें एक जड़ ही धर्म है । जीवद्रव्यमात्र एक चेतन है ॥ १२४ ॥ आगें आकाशादिकमें निश्चय करके चैतन्य है ही नहीं ऐसा अनुमान दिखाते हैं,—[यस्य] जिस द्रव्यके [सुखदुःखज्ञानं] सुखदुःखको जानना [वा] अथवा [हितपरिकर्म] उत्तम कार्यमें प्रवृत्ति [च] और [अहितभीरुत्वं] दुःखदायक कार्यसे भय [न विद्यते] नहीं है [श्रमणाः] गणधरादिक [तं नित्यं] सदैव उस द्रव्यको [अजीवं] अजीव ऐसा तत्व [विंदंति] जानते हैं । भावार्थ—जिन द्रव्योंमें सुखदुःखका जानना

पुद्गलस्यानन्तर हिताहितपरिणमनोद्यमशीलत्वस्य चेति, चैत विशेषाणां नित्यमनुपल भेरविद्यमानत्वान्यगामान्या पवाकाशादयोऽजीवा इति ॥ १२५ ॥

जीवपुद्गलयो सयोगेऽपि भेदनिबन्धनस्वरूपाख्यानमेतत्,—

संठाणा संघादा वण्णरसप्फासगंधसद्दा य ।
पोग्गलदव्वप्पभवा होंति गुणा पज्जया य बहू ॥ १२६ ॥
अरसमरूवमगंधमव्वत्तं चेदणागुणमसद्दं ।
जाण अलिंगग्गहणं जीवमणिद्दिट्ठसंठाणं ॥ १२७ ॥

संस्थानानि संघाता वर्णरसस्पर्शगन्धशब्दाश्च ।
पुद्गलद्रव्यप्रभवा भवन्ति गुणा पर्यायाश्च बहव ॥ १२६ ॥
अरसमरूपमगन्धमव्यक्त चेतनागुणमशब्द ।
जानीह्यलिङ्गग्रहण जीवमनिर्दिष्टसंस्थान ॥ १२७ ॥

पभूत मिथ्यात्वरागादिपरिणमनमात्मद्रव्य च एव हिताहितादिपरीक्षारूपचैतन्यविशेषाणामभा वादचेतना आकाशादय पचेति भावार्थ ॥ १२५ ॥ अथ संस्थानादिपुद्गलपर्याया जीवेन सह क्षीरनीरन्यायेन तिष्ठन्ति निश्चयेन जीवस्वरूप न भवतीति भेदज्ञान दर्शयति,—समचतुर-स्रादिषट्संस्थानानि औदारिकादिशरीरसंबन्धिन पचसघाता वर्णरसस्पर्शगन्धशब्दाश्च सस्थानादि पुद्गलविकाररहितकेवलज्ञानाद्यनन्तचतुष्टयसहितात्परमात्मपदार्थान्निश्चयेन भिन्नत्वात्ते सर्वे च पुद्गलद्रव्यप्रभवा । एतेषु मध्ये के गुणा के पर्याया इति प्रश्ने सति प्रत्युत्तरमाह—वर्णरसस्पर्श-गन्धगुणा भवन्ति सस्थानादयस्तु पर्यायास्ते च प्रत्येक बहव इति सूत्राभिप्राय ॥ १२६ ॥ एव पुद्गलादिपचद्रव्याणामजीवत्वकथनमुख्यतया गाथात्रयेण प्रथमस्थल गत । अथ यदि सस्था नादयो जीवस्वरूप न भवन्ति तर्हि किं जीवस्वरूपमिति प्रश्ने प्रत्युत्तरमाह;—अरसं रसगुण सहितपुद्गलद्रव्यरूपो न भवति रसगुणमात्रो वा न भवति रसग्राहकपौद्गलिकजिह्वाभिधानद्रव्य

नहीं है और जिन द्रव्योंमें इष्ट अनिष्ट कार्य करनेकी शक्ति नहीं है, उन द्रव्योंके विष यमें ऐसा अनुमान होता है कि वे चेतना गुणसे रहित हैं सो वे आकाशादिक ही पाच द्रव्य हैं ॥ १२५ ॥ आगें यद्यपि जीवपुद्गलका सयोग है तथापि आपसमें लक्षणभेद है ऐसा भेद दिखाते हैं,—[संस्थानानि] जीवपुद्गलके सयोगमें जो समचतुरस्रादि षट संस्थान हैं और [संघाता] वज्रवृषभ नाराच आदि संहनन हैं [च] और [वर्ण-रसस्पर्शगंधशब्दा] वर्ण ५ रस ५ स्पर्श ८ गंध २ और शब्दादि [पुद्गलद्रव्य प्रभवा] पुद्गलद्रव्यसे उत्पन्न [बहव] बहुत जातिके [गुणा] सहभू वर्णादि गुण [च] और [पर्याया] संस्थानादि पर्याय [भवन्ति] होते हैं और [जीव] जीवद्रव्यको [अरस] रसगुणरहित, [अरूप] वर्णरहित [अगंध] गंधर-हित [अव्यक्त] अप्रगट[चेतनागुण] ज्ञानदर्शन गुणवाला [अशब्द] शब्दपर्यायर-

अथ पुण्यपापपदार्थव्याख्यानम् । पुण्यपापयोग्यभावस्वभावख्यापनमेतत्,—

मोहो रागो दोसो चित्तपसादो य जस्स भावम्मि ।
विज्जदि तस्स सुहो वा असुहो वा होदि परिणामो ॥ १३१ ॥

मोहो रागो द्वेषश्चित्तप्रसादश्च यस्य भावे ।
विद्यते तस्य शुभो वा अशुभो वा भवति परिणामः ॥ १३१ ॥

इह हि दर्शनमोहनीयविपाककलुषपरिणामता मोहः । विचित्रचारित्रमोहनीयविपाक-प्रत्यये प्रीत्यप्रीती रागद्वेषौ । तस्यैव मन्दोदये विशुद्धपरिणामता चित्तप्रसादपरिणामः । एवमिमे यस्य भावे भवन्ति, तस्यावश्यं भवति शुभोऽशुभो वा परिणामः । तत्र यत्र प्रश

चतुष्टयस्य कर्ता ज्ञानी तु सम्वरादिपदार्थत्रयस्येति भावार्थः ॥ १२८ । १२९ । १३० ॥ एवं नवपदार्थप्रतिपादकद्वितीयमहाधिकारमध्ये पुण्यादिसप्तपदार्थाः जीवपुद्गलसंयोगवियोगपरिणामेन निर्वृत्ता इति कथनमुख्यतया गाथात्रयेण चतुर्थांतराधिकारः समाप्तः । *अथ पुण्यपापाधिकारे* गाथाचतुष्टयं भवति तत्र गाथाचतुष्टयमध्ये प्रथमं तावत्परमानंदैकस्वभावशुद्धात्मनः सकाशाद्भि-न्नस्य भावपुण्यपापयोग्यपरिणामस्य सूचनमुख्यत्वेन "मोहो व रागदोसो" इत्यादिगाथासूत्रमेकं । अथ शुद्धबुद्धैकस्वभावशुद्धात्मनः सकाशाद्भिन्नस्य हेयस्वरूपस्य द्रव्यभावपुण्यपापद्वयस्य व्याख्या-नमुख्यत्वेन "सुहपरिणामो" इत्यादि सूत्रमेकं, अथ नैयायिकमतनिराकरणार्थं पुण्यपापद्वयस्य मूर्तत्वसमर्थनरूपेण "जह्मा कम्मस्स फलं" इत्यादि सूत्रमेकं, अथ चिरंतनागतुकयोर्मूर्तयोः कर्म-णोः स्पृष्टत्वबद्धत्वस्थापनार्थं शुद्धनिश्चयेनामूर्तस्यापि जीवस्यानादिबंधसंतानापेक्षया व्यवहारनयें-न मूर्तत्वं मूर्तजीवेन सह मूर्तकर्मणो बंधप्रतिपादनार्थं च "मुत्तो फासदि" इत्यादि सूत्रमेकमिति गाथाचतुष्टयेन पंचमांतराधिकारे समुदायपातनिका । तद्यथा । अथ पुण्यपापयोग्यभावस्वरूपं कथ्यते,—मोहो वा रागो वा द्वेषश्चित्तप्रसादश्च यस्य जीवस्य भावे मनसि विद्यते तस्य शुभो शुभो वा भवति परिणाम इति । इतो विशेषः—दर्शनमोहोदये सति निश्चयशुद्धात्मरुचिरहितस्य

पाकर जीवके अशुद्ध परिणाम होते हैं, और उन अशुद्ध परिणामोंके निमित्तसे पुद्गलप रिणाम होते हैं ॥ १२८।१२९।१३० ॥ आगें पुण्यपापपदार्थका व्याख्यान करते हैं सो प्रथम ही पुण्यपापपदार्थोंके योग्य परिणामोंका स्वरूप दिखाते हैं,—[**यस्य**] जिसके [**भावे**] भावोंमें [**मोह**] गहलरूप अज्ञानपरिणाम [**राग**] परद्रव्योंमें ... परिणाम [**द्वेष**] अप्रीतिरूप परिणाम [**च**] और [**चित्तप्रसाद**] चित्तकी प्रसन्नता [**विद्यते**] प्रवर्ते है [**तस्य**] उस जीवके [**शुभ**] शुभ [**वा**] । अथवा [**अशुभ वा**] अशुभ ऐसा [**परिणाम**] परिणमन [**भवति**] होता है **भावार्थ**—इस लोकमें जीवके निश्चयसे जब दर्शनमोहनीय कर्मका उदय होता है तब

---

१ निर्मलपरिणाम २ परिणामप्रत्यय ३ यस्मिन् जाव ।

मूर्त्तं स्पृशति मूर्त्तं मूर्त्तो मूर्त्तेन बंधमनुभवति ।
जीवो मूर्तिविरहितो गाहति तानि तैरवगाह्यते ॥ १३४ ॥

इह हि संसारिणि जीवेऽनादिसंतानेन प्रवृत्तमास्ते मूर्तकर्म । तत्स्पर्शादिमत्त्वादागामि मूर्तकर्म स्पृशति । ततस्तन्मूर्तं तेन सह स्नेहगुणवशाद्बंधमनुभवति । एष मूर्तयोः कर्मणोर्बंधप्रकारः । अथ निश्चयनयेनाऽमूर्तो जीवोऽनादिमूर्तकर्मनिमित्तरागादिपरिणामस्निग्धः सन्, विशिष्टतया मूर्तानि कर्माण्यवगाहते । तत्परिणामनिमित्तलब्धात्मपरिणामैः मूर्तकर्मभिरपि विशिष्टतयाऽवगाह्यते च । अयं त्वन्योन्यावगाहात्मको जीवमूर्तकर्मणोर्बंधप्रकारः ।

चिरंतनाभिनवमूर्तकर्मणोस्तथैवामूर्तजीवमूर्तकर्मणोश्च नयविभागेन बंधप्रकारं कथयति । अथवा मूर्तरहितो जीवो मूर्तकर्माणि कथं बध्नाति नैयायिकादिमतानुसारिणा शिष्येण पूर्वपक्षे कृते सति नयविभागेन परिहारं ददाति,—**मुत्तो** निर्विकारशुद्धात्मसंवित्तिभावेनोपार्जितमनादिसंतानेनागतं मूर्तं कर्म तावदास्ते जीवे । तच्च किंकरोति । **फासदि मुत्तं** स्वयं स्पर्शादिमत्त्वेन मूर्तत्वादभिनवं स्पर्शादिमत्संयोगमात्रेण मूर्तं कर्म स्पृशति । न केवलं स्पृशति । **मुत्तो मुत्तेण बंधमणुहवदि** अमूर्तातीन्द्रियनिर्मलात्मानुभूतिविपरीतं जीवस्य मिथ्यात्वरागादिपरिणामं निमित्तं लब्ध्वा पूर्वोक्तं मूर्तं कर्म नवतरमूर्तकर्मणा सह स्वकीयस्निग्धरूक्षपरिणत्युपादानकारणेन संश्लेषरूपं बंधमनुभवति इति मूर्तकर्मणोर्बंधप्रकारो ज्ञातव्यः । इदानीं पुनरपि मूर्तजीवमूर्तकर्मणोर्बंधः कथ्यते । **जीवो मुत्तिविरहिदो** शुद्धनिश्चयेन जीवो मूर्तिविरहितोऽपि व्यवहारेण अनादिकर्मबंधवशान्मूर्तः सन् । किं करोति । **गाहदि ते** अमूर्तातीन्द्रियनिर्विकारसदानंदैकलक्षणसुखरसास्वादविपरीतेन मिथ्यात्वरागादिपरिणामेन परिणतः सन् तान् कर्मवर्गणायोग्यपुद्गलान् गाहते परस्परानुप्रवेश

करते हैं,—[**मूर्त्तं**] बंधपर्यायकी अपेक्षा मूर्तीक संसारी जीवके कर्मपुंज [**मूर्त्तं**] मूर्त्तीक कर्मको [**स्पृशति**] स्पर्शन करता है इसकारण [**मूर्त**] मूर्तीक कर्मपिंड जो है सो [**मूर्त्तेन**] मूर्त्तीक कर्मपिण्डसे [**बंध**] परस्पर बंधावस्थाको [**अनुभवति**] प्राप्त होता है । [**मूर्त्तिविरहित.**] मूर्तिभावसे रहित [**जीव**] जीव [**तानि**] उन कर्मोंके साथ बंधावस्थाओंको [**गाहति**] प्राप्त होता है । [**तै.**] उन ही कर्मोंसे [**"जीव"**] आत्मा जो है सो [**अवगाह्यते**] एकक्षेत्रावगाह कर बंधता है । **भावार्थ**—इस संसारी जीवके अनादि कालसे लेकर मूर्तीक कर्मोंसे संबंध है वे कर्म स्पर्शरसगंधवर्णमयी हैं । इससे आगामी मूर्त्तकर्मोंसे अपने स्निग्धरूक्ष गुणोंके द्वारा बंधता है, इसकारण मूर्त्तीक कर्मसे मूर्त्तीकका बंध होता है । फिर निश्चयनयकी अपेक्षा जीव अमूर्त्तीक है अनादिकर्मसंयोगसे रागद्वेषादिक भावोंसे स्निग्धरूक्षभावपरिणया हुवा नवीन कर्मपुंजको आस्रव करता है उन कर्मसे पूर्वबद्ध-

१ आत्मनिमूर्तकर्म—२ निश्चयनयेन जीव अमूर्तोऽस्ति परंतु अनादिमूर्तकर्मनिमित्तरागादिपरिणामस्निग्धः सन् विशिष्टतया मूर्तानि कर्माणि अवगाहते ।

प्रशस्तरागस्वरूपाख्यानमेतत्,—

अरहंतसिद्धसाहुसु भत्ती धम्मम्मि जा य खलु चेट्ठा ।
अणुगमणं पि गुरूणं पसत्थरागो त्ति वुच्चंति ॥ १३६ ॥

अर्हत्सिद्धसाधुषु भक्तिर्धर्मे या च खलु चेष्टा ।
अनुगमनमपि गुरूणां प्रशस्तराग इति ब्रुवन्ति ॥ १३६ ॥

अर्हत्सिद्धसाधुषु भक्तिर्धर्मे व्यवहारचारित्रानुष्ठाने वासना प्रधाना चेष्टा । गुरूणामाचार्यादीनां रसिकत्वेनानुगमनम् । एष प्रशस्तो रागः प्रशस्तविषयत्वात् । अयं हि स्थूललक्ष्यतया केवलभक्तिप्रधानस्य ज्ञानिनो भवति । उपरितनभूमिकायामलब्धास्पदस्या-

---

पुण्णं जीवस्स आसवदि यस्येत्थं पूर्वोक्ता त्रय शुभपरिणामा सन्ति तस्य जीवस्य द्रव्यपुण्यास्रवकारणभूतं भावपुण्यमास्रवतीति सूत्राभिप्रायः ॥ १३५ ॥ एवं शुभास्रवे सूत्रगाथा गता । अथ प्रशस्तरागस्वरूपमावेदयति,—अर्हत्सिद्धसाधुषु भक्तिः **धम्मम्हि जा च खलु चेट्ठा** धर्मे शुभरागचरित्रे या खलु चेष्टा **अणुगमणंपि** अनुगमनमनुव्रजनमनुकूलवृत्तिरित्यर्थः । केषां । **गुरूणं** गुरूणां **पसत्थरागोत्ति उच्चति** एते सर्वे पूर्वोक्ताः शुभभावाः परिणामाः प्रशस्तरागा इत्युच्यते । तथाहि—निर्दोषिपरमात्मनः प्रतिपक्षभूतं यदार्तरौद्ररूपध्यानद्वयं तेनोपार्जिता या ज्ञानावरणादिमूलोत्तरप्रकृतयस्तासां रागादिविकल्परहितधर्मध्यानशुक्लध्यानद्वयेन विनाशं कृत्वा क्षुधाद्यष्टादशदोषरहिताः केवलज्ञानाद्यनन्तचतुष्टयसहिताश्च जाता एतेऽर्हन्तो भण्यन्ते । लौकिकाञ्जनसिद्धादिविलक्षणा ज्ञानावरणाद्यष्टकर्माभावेन सम्यक्त्वाद्यष्टगुणलक्षणा लोकाग्रनिवासि-

---

नहीं है [**“तस्य” जीवस्य**] उस जीवके [**पुण्यं**] पुण्य [**आस्रवति**] आता है । **भावार्थ**—शुभ परिणाम तीन प्रकारके हैं अर्थात्–प्रशस्तराग १ अनुकम्पा २ और चित्तप्रसाद ३ ये तीनों प्रकारके शुभपरिणाम द्रव्यपुण्यप्रकृतियोंको निमित्तमात्र हैं इस कारण जो शुभभाव हैं वे तो भावास्रव हैं तत्पश्चात् उन भावोंके निमित्तसे शुभयोगद्वारकर जो शुभ वर्गणायें आतीं हैं वे द्रव्यपुण्यास्रव हैं ॥ १३५ ॥ आगें प्रशस्तरागका स्वरूप दिखाते हैं,—[**अर्हत्सिद्धसाधुषु**] अरहंत सिद्ध और साधु इन तीन पदोंमें जो [**भक्तिः**] स्तुति वंदनादिक [**च**] और [**या**] जो [**धर्मे**] अरहंत प्रणीत धर्ममें [**खलु**] निश्चय करकें [**चेष्टा**] प्रवृत्ति, [**गुरूणां**] धर्माचरणके उपदेष्टा आचार्यादिकोंका [**अनुगमनं अपि**] भक्ति भावसहित उनके पीछें होकर चलना अथवा उनकी आज्ञानुसार चलना भी [**इति**] इसप्रकार महापुरुष [**प्रशस्तरागः**] भला राग [**ब्रुवन्ति**] कहते हैं । **भावार्थ**—अरहंतसिद्धसाधुओंमें भक्ति व्यवहार चारित्रका आचरण और आचार्यादिक महंत पुरुषोंके चरणोंमें

---

१ प्रशस्तराग ... [illegible] ... २ अप्राप्तस्थानस्यास्थानराग ... [illegible]

नुकम्पा । ज्ञानिनस्त्वधस्तनभूमिकासु विहरमाणस्य जन्मार्णवनिमग्नजगदवलोकनान्मनाग्मनः खेद इति ॥ १३७ ॥

चित्तकलुषत्वस्वरूपाख्यानमेतत्,—

कोधो व जदा माणो माया लोभो व चित्तमासेज्ज ।
जीवस्स कुणदि खोहं कलुसो त्ति य तं बुधा वेंति ॥ १३८ ॥

क्रोधो वा यदा मानो माया लोभो वा चित्तमासाद्य ।
जीवस्य करोति क्षोभं कालुष्यमिति च तं बुधा वदन्ति ॥ १३८ ॥

क्रोध-मान-मायालोभानां तीव्रोदये चित्तस्य क्षोभः कालुष्यम् । तेषामेव मन्दोदये तस्य

कृपया **तस्सेसा होदि अणुकंपा** तस्यैषा भवत्यनुकम्पेति । तथाहि—तीव्रतृष्णातीव्रक्षुधातीव्ररोगादिना पीडितमवलोक्याज्ञानी जीवः केनाप्युपायेन प्रतीकारं करोमीति व्याकुलो भूत्वानुकम्पां करोति, ज्ञानी तु स्वस्य भावनामलभमानः सन् संक्लेशपरित्यागेन यथासंभवं प्रतीकारं करोति तं दुःखितं दृष्ट्वा विशेषसंवेगवैराग्यभावनां च करोतीति सूत्रतात्पर्यम् ॥ १३७ ॥ अथ चित्तकलुषतास्वरूपं प्रतिपादयति,—**कोधो व** उत्तमक्षमापरिणतिरूपशुद्धात्मतत्त्वानुभूतेः प्रतिपक्षभूतक्रोधादयो वा **जदा माणो** निरहंकारशुद्धात्मोपलब्धेः प्रतिकूलो यदा काले मानो वा **माया** निष्प्रपञ्चात्मोपलम्भविपरीता माया वा **लोहो व** शुद्धात्मभावनोत्थलाभे प्रतिपक्षो लोभो वा **चित्तमासेज्ज** चित्तमाश्रित्य **जीवस्स कुणदि खोहं** अक्षुभितशुद्धात्मानुभूतेर्विपरीतं जीवस्य क्षोभं चित्तस्वरूपं करोति **कलुसोत्ति य तं बुधा वेंति** तं क्रोधादिजनितं चित्त

दयाभाव करके [प्रतिपद्यते] उस दुःखके दूर करनेकी क्रियाको प्राप्त होता है [तस्य] उस पुरुषके [एषा] यह [अनुकम्पा] दया [भवति] होती है। **भावार्थ**—दयाभाव अज्ञानीके भी होता है और ज्ञानीके भी होता है परंतु इतना विशेष है कि अज्ञानीके जो दयाभाव है सो किसी ही पुरुषको दुःखित देखकर तो उसके दुःख दूर करनेके उपायमें अशुद्धिसे आकुलचित्त होकर प्रवर्ते है और जो ज्ञानी जीवके गुणस्थानानमें प्रवर्ते है, उसके दयाभाव जो होता है सो जब दुःखसमुद्रमें मग्न संसारीजीवोंको जानता है तब ऐसा जानकर किसी कालमें मनको खेद उपजाता है ॥ १३७ ॥ आगे चित्तकी कलुषताका स्वरूप दिखाते हैं,—[यदा] जिस समय [क्रोधः] क्रोध [वा] अथवा [मानः] अभिमान [वा] अथवा [माया] कुटिलभाव अथवा [लोभः] इष्ट वस्तुविषे [चित्तं] मनको [आसाद्य] प्राप्त होकर [जीवस्य] जीवके [क्षोभं] अतिआकुलतारूप भाव [करोति] करता है [तं] उसको [बुधाः] ज्ञानी महंत पुरुष कहते हैं कि [कालुष्यं इति] कलुष

1 [illegible]

यस्य न विद्यते रागो द्वेषो मोहो वा सर्वद्रव्येषु ।
नास्रवति शुभमशुभं समसुखदुःखस्य भिक्षोः ॥ १४२ ॥

यस्य रागरूपो द्वेषरूपो मोहरूपो वा समग्रपरद्रव्येषु न हि विद्यते भावः तस्य निर्विकारचैतन्यत्वात्समसुखदुःखस्य भिक्षोः शुभमशुभं च कर्म नास्रवति । किन्तु संवियत एव। तदत्र मोहरागद्वेषपरिणामनिरोधो भावसंवरः । तन्निमित्तः शुभाशुभकर्मपरिणामनिरोधो योगद्वारेण प्रविशतां पुद्गलानां द्रव्यसंवर इति ॥ १४२ ॥

विशेषेण संवरस्वरूपाख्यानमेतत्,—

जस्स जदा खलु पुण्णं जोगे पावं च णत्थि विरदस्स ।
संवरणं तस्स तदा सुहासुहकदस्स कम्मस्स ॥ १४३ ॥

यस्य यदा खलु पुण्यं योगे पापं च नास्ति विरतस्य ।
संवरणं तस्य तदा शुभाशुभकृतस्य कर्मणः ॥ १४३ ॥

यस्य योगिनो विरतस्य सर्वतो निवृत्तस्य योगे वाङ्मनःकायकर्मणि शुभपरिणामरूपं

जिस्स । स च । रागो दोसो मोहो य जीवस्य शुद्धपरिणामात् परमधर्मलक्षणाद्विपरीतो रागद्वेषपरिणामो मोहपरिणामो वा । क्व । विषयेषु । सव्वदव्वेसु शुभाशुभसमस्तद्रव्येषु णासवदि सुहं असुहं नास्रवति शुभाशुभकर्म । कस्य । भिक्खुस्स तस्य रागादिरहितशुद्धोपयोगिनः तपोधनस्य । कथंभूतस्य । समसुहदुक्खस्स समस्तशुभाशुभसंकल्परहितशुद्धात्मध्यानसमुत्पन्नपरमसुखामृततृप्तिस्वभावात्समरसीभावेन अनभिव्यक्तसुखदुःखरूपहर्षविषादविकाराभावात्समसुखदुःखस्येति । अत्र शुभाशुभसंवरसमर्थः शुद्धोपयोगो भावसंवरः भावसंवराधारेण नवतरकर्मनिरोधो द्रव्यसंवर इति तात्पर्यार्थः ॥ १४२ ॥ अथायोगिचरमसमयजिनगुणस्थानापेक्षया निरवशेषेण पुण्यपापसंवरं प्रतिपादयति,—जस्स यस्य योगिनः । कथंभूतस्य । विरदस्स

[द्वेष] द्वेषभाव [वा] अथवा [मोह] वस्तुकी अश्रद्धारूप मोह [न विद्यते] नहीं है [“तस्य”] उस [समसुखदुःखस्य] समान है सुखदुःख रस जिसके ऐसे [भिक्षोः] महामुनिके [शुभं] शुभरूप [अशुभं] पापरूप पुद्गलद्रव्य [न आस्रवति] आस्रवभावको प्राप्त नहीं होता । भावार्थ—जिस जीवके रागद्वेष मोहरूप भाव परद्रव्योंमें नहीं है उसही समरसीके शुभाशुभ कर्मास्रव नहीं होता उसके संवर ही होता है इसकारण रागद्वेषमोहपरिणामोंका निरोध सो भावसंवर कहाता है उस भावसंवरके निमित्तसे योगद्वारोंसे शुभाशुभरूप कर्मवर्गणाओंका निरोध होना सो द्रव्यसंवर है ॥ १४२ ॥ आगे संवरका विशेष स्वरूप कहते हैं—[खलु यदा] निश्चय करके जिस समय [यस्य] जिस [विरतस्य] परद्रव्यत्यागीके [योगे]

---

१ संव । भवति

पुण्यमशुभपरिणामरूप पापञ्च यदा न भवति तस्य तदा शुभाशुभभावकृतस्य द्रव्यकर्मण सवर स्वकारणभावात्प्रसिद्ध्यति । तदत्र शुभाशुभपरिणामनिरोधो भावपुण्यपापसवरो द्रव्यपुण्यपापसवरस्य हेतु प्रधानोऽवधारणीय इति ॥ १४३ ॥ इति सवरपदार्थव्याख्यान समाप्तम् ।

अथ निर्जरापदार्थव्याख्यानम् । निर्जरास्वरूपाख्यानमेतत्,—

सवरजोगेहिं जुदो तवेहिं जो चिट्ठदे बहुविहेहिं ।
कम्माण णिज्जरण बहुगाण कुणदि सो णियद ॥ १४४ ॥

सवरयोगाभ्या युक्तस्तपोभिर्यश्चेष्टते बहुविधै ।
कर्मणा निर्जरण बहुकाना करोति स नियत ॥ १४४ ॥

शुभाशुभपरिणामनिरोध सवर, शुद्धोपयोग । ताभ्या युक्तस्तपोभिरनशनावमौदय

शुभाशुभसकल्पविकल्परहितस्य **णत्थि** नास्ति **जदा** **खलु** यदा काले स्फुट स्फुट । किं नास्ति । **पुण्ण पाव च** पुण्यपापद्वय । क नास्ति । **योगे** मनोवाक्कायकर्मणि । न केवल पुण्यपापद्वय नास्ति । वस्तुतस्तु योगोपि मवरण **तस्स तदा** तस्य भगवतस्तदा सवरण भवति । कस्य सबधि । **कम्मस्स** पुण्यपापरहितानतगुणस्वरूपपरमात्मनो विलक्षणस्य कर्मण । पुनरपि किंविशिष्टस्य । **सुहासुहकदस्स** शुभाशुभकृतस्येति । अत्र निर्विकारशुद्धात्मानुभूतिभावसवरस्तन्निमित्तद्रव्यकर्मनिरोधो द्रव्यसवर इति भावार्थ ॥ १४३ ॥ एव नवपदार्थप्रतिपादकद्वितीयमहाधिकारमध्ये सवरपदार्थव्याख्यानमुख्यतया गाथात्रयेण **सप्तमोंतराधिकार** समाप्त ॥ अथ शुद्धात्मानुभूतिलक्षणशुद्धोपयोगसाध्ये निर्जराधिकारे 'सवरजोगेहिं जुदो' इत्यादि गाथात्रयेण समुदायपातनिका । अथ निर्जरास्वरूप कथयति,—**सवर जोगेहिं जुदो**

मनवचनकायरूप योगोंमें [**पाप**] अशुभपरिणाम [**च**] और [**पुण्य**] शुभपरिणाम [**नास्ति**] नहीं है [**तदा**] उस समय [**तस्य**] उस मुनिके [**शुभाशुभकृतस्य कर्मण**] शुभाशुभ भावोंसे उत्पन्न कियेहुये द्रव्यकर्मास्रवोंके [**सवरण**] निरोधक सवरभाव होते हैं । **भावार्थ**—जब इस महामुनिके सर्वथाप्रकार शुभाशुभ योगोंकी प्रवृत्तिसे निवृत्ति होती है तब उसके आगामी कर्मोंका निरोध होता है। मूलकारण भावकर्म हैं जब भावकर्म ही चले जाय तब द्रव्यकर्म कहासे होय ? इसकारण यह बात सिद्ध हुई कि शुभाशुभ भावोंका निरोध होना भावपुण्यपापसवर होता है । यह ही भावसवर द्रव्यपुण्यपापका निरोधक प्रधान हेतु है । इसप्रकार सवरपदार्थका व्याख्यान पूर्ण हुवा ॥ १४३ ॥ अब निर्जरापदार्थका व्याख्यान किया जाता है,—

[**य**] जो भेद विज्ञानी [**सवरयोगाभ्या**] शुभाशुभास्रवनिरोधरूप सवर और शुद्धोपयोगरूप योगोंकर [**युक्त**] सयुक्त [**बहुविधै**] नाना प्रकारके [**तपोभि**] अतरग बाहरग तपोंकर द्वारा [**चेष्टते**] उपाय करता है

वृत्तिपरिसंख्यानरसपरित्यागविविक्तशय्यासनकायक्लेशादिभेदाद्बहिरङ्गैः प्रायश्चित्तविनयवैयावृत्त्यस्वाध्यायव्युत्सर्गध्यानभेदादन्तरङ्गैश्च बहुविधैर्यस्तपोभिर्वर्तते स खलु बहूनां कर्मणां निर्जरणं करोति। तदत्र कर्मवीर्यशातनसमर्थो बहिरङ्गान्तरङ्गतपोभिर्बृंहितः शुद्धोपयोगो भावनिर्जरा। तदनुभावनीरसीभूतानामेकदेशसंक्षयः समुपात्तकर्मपुद्गलानां द्रव्यनिर्जरेति ॥१४४॥

मुख्यनिर्जराकारणोपन्यासोऽयम्,—

जो संवरेण जुत्तो अप्पट्ठपसाधगो हि अप्पाणं।
मुणिऊण झादि णियदं णाणं सो संधुणोदि कम्मरयं ॥ १४५ ॥

यः संवरेण युक्तः आत्मार्थप्रसाधको ह्यात्मानं।
ज्ञात्वा ध्यायति नियतं ज्ञानं स संधुनोति कर्मरजः ॥ १४५ ॥

संवरयोगाभ्यां युक्तः निर्मलात्मानुभूतिबलेन शुभाशुभपरिणामनिरोधः संवरः, निर्विकल्पलक्षणध्यानशब्दवाच्यशुद्धोपयोगो योगस्ताभ्यां युक्तः तवहिं जो वट्टदे बहुविहेहिं तपोभिर्वर्तते बहुविधैः अनशनावमौदर्यवृत्तिपरिसंख्यानरसपरित्यागविविक्तशय्यासनकायक्लेशभेदेन शुद्धात्मानुभूतिसहकारिकारणैर्बहिरङ्गषड्विधैस्तथैव प्रायश्चित्तविनयवैयावृत्त्यस्वाध्यायव्युत्सर्गध्यानभेदेन सह शुद्धात्मस्वरूपप्रतपनलक्षणैरभ्यन्तरषड्विधैश्च तपोभिरतैश्च कम्माणं णिज्जरणं बहुगाणं कुणदि सो णियदं कर्मणां निर्जरणं बहुकानां करोति स पुरुषः नियतं निश्चितमिति। अत्र द्वादशविधतपसा वृद्धिं गतो वीतरागपरमानन्दैकलक्षणः कर्मशक्तिनिर्मूलनसमर्थः शुद्धोपयोगो भावनिर्जरा तस्य शुद्धोपयोगस्य सामर्थ्येन नीरसीभूतानां पूर्वोपार्जितकर्मपुद्गलानां संवरपूर्वकभावनैकदेशसंक्षयो द्रव्यनिर्जरेति सूत्रार्थः ॥१४४॥ अथात्मध्यानं मुख्यवृत्त्या निर्जराकारणमिति प्रकाशयति;—जो संवरेण जुत्तो यः संवरेण युक्तः यः कर्ता शुभाशुभरागाद्यास्रवनिरोधलक्षण

[स] वह पुरुष [नियतं] निश्चयकरकें [बहुकानां] बहुतसे [कर्मणां] कर्मोंकी [निर्जरणं] निर्जरा [करोति] करता है। भावार्थ—जो पुरुष संवर और शुद्धोपयोगसे संयुक्त, तथा अनसन, अवमौदर्य, वृत्तिपरिसंख्यान, रसपरित्याग, विविक्तशय्यासन और कायक्लेश इन छहप्रकारके बहिरंग तप तथा प्रायश्चित्त विनय वैय्यावृत्य स्वाध्याय व्युत्सर्ग और ध्यान इन छःप्रकारके अंतरंग तपकर सहित है वह बहुतसे कर्मोंकी निर्जरा करता है। इससे यह भी सिद्ध हुआ कि अनेक कर्मोंकी शक्तियोंके गालनेको समर्थ द्वादश प्रकारके तपोंसे बढ़ा हुवा जो शुद्धोपयोग वही भावनिर्जरा है और भावनिर्जराके अनुसार नीरस होकर पूर्वमें बंधे हुये कर्मोंका एकदेश खिर जाना सो द्रव्यनिर्जरा है ॥ १४४ ॥ आगे निर्जराका कारण विशेषताके साथ दिखाते हैं—[यः] जो पुरुष

---

१ कर्म अपना रस देकर खिर जावे उसको निर्जरा कहते हैं।
२ पाठ।

यो हि संवरेण शुभाशुभपरिणामपरमनिरोधेन युक्तः परिज्ञातवस्तुस्वरूपः परप्रयोजनेभ्यो व्यावृत्तबुद्धिः केवलं स्वप्रयोजनसाधनोद्यतमनाः आत्मानं स्वोपलम्भेनोपलभ्य गुणगुणिनोर्वस्तुत्वेनाभेदात्तमेव ज्ञानं स्वं स्वेनाविचलितमनास्संचेतयते स खलु नितान्तनिस्स्नेहः प्रहीणस्नेहाभ्यङ्गपरिष्वङ्गशुद्धस्फटिकस्तम्भवत् पूर्वोपात्तं कर्मरजः संधुनोति । एतेन निर्जरामुख्यत्वे हेतुत्वं ध्यानस्य द्योतितमिति ॥ १४५ ॥

ध्यानस्वरूपाभिधानमेतत्,–

जस्स ण विज्जदि रागो दोसो मोहो व जोगपरिकम्मो ।
तस्स सुहासुहडहणो झाणमओ जायए अगणी ॥ १४६ ॥

यस्य न विद्यते रागो द्वेषो मोहो वा योगपरिकर्म ।
तस्य शुभाशुभदहनो ध्यानमयो जायते अग्निः ॥ १४६ ॥

संवरेण युक्तः **अप्पट्ठपसाहगो हि** आत्मार्थप्रसाधकः हि स्फुटं हेयोपादेयतत्त्वं विज्ञाय परप्रयोजनेभ्यो व्यावृत्य शुद्धात्मानुभूतिलक्षणकेवलस्वकार्यप्रसाधकः **अप्पाणं** सर्वात्मप्रदेशेषु निर्विकारनित्यानन्दैकाकारपरिणतमात्मानं **मुणिदूण** मत्वा ज्ञात्वा रागादिविभावरहितस्वसंवेदनज्ञानेन ज्ञात्वा **झादि** निश्चलात्मोपलब्धिलक्षणनिर्विकल्पध्यानेन ध्यायति **णियदं** निश्चितं घोरोपसर्गपरीषहप्रस्तावे निश्चलं यथा भवति । कथंभूतमात्मानं । **णाणं** निश्चयेन गुणगुणिनोरभेदादविभिन्नभेदज्ञानपरिणतत्वादात्मापि ज्ञानं **सो** स पूर्वोक्तलक्षणः परमात्मध्यानध्याता । किं करोति । **संधुणोदि कम्मरयं** संधुनोति कर्मरजो निर्जरयतीति । अत्र यदुक्तरया ध्यानं निर्जराकारणं व्याख्यातमिति सूत्रतात्पर्यं ॥ १४५ ॥ अथ पूर्वं यन्निर्जराकारणं भणितं ध्यानं तस्योत्पत्तिसा-

[संवरेण युक्तः] संवरभावोंकर संयुक्त है तथा **[आत्मार्थप्रसाधकः]** आत्मीक स्वभावका साधनहारा है । **[सः]** वह पुरुष **[हि]** निश्चय करके **[आत्मानं]** शुद्ध चिन्मात्र आत्मस्वरूपको **[ज्ञात्वा]** जान करके **[नियतं]** सदैव **[ज्ञानं]** आत्माके सर्वस्वको **[ध्यायति]** ध्याता है वही पुरुष **[कर्मरजः]** कर्मरूपी धूलिको **[संधुनोति]** उड़ा देता है । भावार्थ—जो पुरुष कर्मोंके निरोधकर संयुक्त है, आत्मस्वरूपका जाननहारा है, सो परकार्यसे निवृत्त होकर आत्मकार्यका उद्यमी होता है, तथा अपने स्वरूपको पाकर गुणगुणीके अभेद कथनकर अपने ज्ञानगुणको आपसे अभेद निश्चल अनुभवै है, वह पुरुष सर्वथाप्रकार वीतराग भावोंके द्वारा पूर्वकालमें बंधे हुए कर्मरूपी धूलिको उड़ा देता है अर्थात् कर्मोंको खपा देता है । जैसे चिकनाईरहित शुद्धस्फटिकका थंभ निर्मल होता है उसीप्रकार निर्जराका मुख्य हेतु ध्यान है अर्थात् निर्जराका कारण है ॥१४५॥ अब ध्यानका स्वरूप कहते हैं,–**[यस्य]** जिस जीवके

१ [illegible] २ [illegible] ३ [illegible]
[illegible]

तथा चोक्तम्—"अज्जवि तियरणसुद्धा, अप्पा झाएवि लहइ इदत्त। लोयंतियदेवत्त तत्थ चुया णिव्वुदिं जंति" ॥ अतो णत्थि सुंईण कालो थोओ वय च दुम्मेहा। तण्णवरि सिक्खियव्व ज जरमरण खइ कुणइ" ॥ १४६ ॥ इति निर्जरापदार्थव्याख्यान समासम्।

णाणिस्स त अप्पसहावविदे ण हु मण्णइ सो दु अण्णाणी" "अज्जवि तियरणसुद्धा अप्पा णाए वि लहहि इदत्त लोयंतियदेवत्त तत्थ चुदा णिव्वुदिं जंति"। तत्र युक्तिमाह। पंचमकाले यथा ख्यातसंज्ञ निश्चयचारित्र नास्ति तर्हि सरागचारित्रसंज्ञमपहृतसंयममाचरतु तपस्विन। तथा चोक्त तत्त्वानुशासनध्यानग्रंथे "चरितारो न सन्त्यद्य यथाख्यातस्य सम्प्रति। तत्किमन्ये यथा शक्तिमाचरन्तु तपोधनाः"। यच्चोक्त सकलश्रुतधारिणा ध्यान भवति तदुत्सर्गवचन, अपवादव्याख्याने तु पंचसमितित्रिगुप्तिप्रतिपादकश्रुतिपरिज्ञानमात्रेणैव केवलज्ञान जायते यद्येव न भवति तर्हि "तुसमास घोसतो सिवभूदी केवली जादो" इत्यादि वचन कथ घटते। तथा चोक्त चारित्रसारादिग्रंथे पुलाकादिपंचनिर्ग्रंथव्याख्यानकाले। मुहूर्तादूर्ध्वं ये केवलज्ञानमुत्पादयन्ति ते निर्ग्रंथा भण्यते क्षीणकषायगुणस्थानवर्तिनस्तेषामुत्कृष्टेन श्रुत चतुर्दशपूर्वाणि जघन्येन पुन पंचसमितित्रिगुप्तिसंज्ञा अष्टौ प्रवचनमातर। यदप्युक्त वज्रवृषभनाराचोत्तमसंहननो ध्यान भवति तदप्युत्सर्गवचन अपवादव्याख्यान पुनरपूर्वादिगुणस्थानवर्तिनां उपशमक्षपकश्रेण्योर्यच्छुक्लध्यान तदपेक्षया स नियम अपूर्वादधस्तनगुणस्थानेषु धर्मध्याने निषेधक न भवति। तदप्युक्त तत्रैव तत्त्वानुशासने "यत्पुनर्वज्रकायस्य ध्यानमित्यागमे वच। श्रेण्योर्ध्यान प्रतीत्योक्त तन्नाधस्तान्निषेधक॥" एव स्तोकश्रुतेनापि ध्यान भवतीति ज्ञात्वा किमपि शुद्धात्मप्रतिपादक संवरनिर्जराकारण जरमरणहर सारोपदेश गृहीत्वा ध्यान कर्तव्यमिति भावार्थ। उक्त च। "अतो णत्थि सुदीण कालो थोओ वय च दुम्मेहा तण्णवरि सिक्खियव्व ज जरमरण खय कुणइ" ॥ १४६ ॥ एव नवपदार्थप्रतिपादकद्वितीयमहाधिकारमध्ये निर्जराप्रतिपादकमुख्यत्वेन गाथात्रयेणाष्टमोऽन्तराधिकार समाप्त ॥ अथ निर्विकारपरमात्मसम्यक्श्रद्धानज्ञानानुष्ठानरूपनिश्च

गर्भित ध्यानका अनुभवी है, इसकारण परमात्मपदको पाता है[1]। इसप्रकार निर्जरा पदार्थका व्याख्यान पूरा हुआ ॥ १४६ ॥ अब बन्ध पदार्थका व्याख्यान किया जाता

---

१ अद्यापि त्रिरत्नशुद्धा आत्मानं ध्यात्वा लभन्ते इन्द्रत्वम्। [illegible] ॥ १ ॥
[illegible] ॥ १ ॥

१ [illegible] इसको इस काल [illegible]
[illegible]

द्रव्यबन्धस्य हेतुमाख्यानमेतत् ।—

जं सुहमसुहमुदिण्णं भावं रत्तो करेदि जदि अप्पा ।
सो तेण हवदि बंधो पोग्गलकम्मेण विविहेण ॥ १४७ ॥

यं शुभाशुभमुदीर्णं भावं रक्तः करोति यद्यात्मा ।
स तेन भवति बद्धः पुद्गलकर्मणा विविधेन ॥ १४७ ॥

यदि अन्यद्रव्यसंयोगाश्रयणज्ञानादिरक्तः कर्मोदयप्रभावत्वादुदीर्णं शुभमशुभं वा भावं करोति, तदा स आत्मा तेन निमित्तभूतेन भावेन पुद्गलकर्मणा विविधेन बद्धो भवति । तदत्र मोहरागद्वेषस्निग्धः शुभोऽशुभो वा परिणामो जीवस्य भावबन्धः । तन्निमित्तेन शुभाशुभकर्मत्वपरिणतानां जीवेन सहान्योन्यमूर्च्छनं पुद्गलानां द्रव्यबन्ध इति ॥ १४७ ॥

यदिदानीं द्व्यबन्धकारणमाख्यानमेतत् ।—

जोगणिमित्तं गहणं जोगो मणवयणकायसंभूदो ।
भावणिमित्तो बंधो भावो रदिरागदोसमोहजुदो ॥ १४८ ॥

धर्मोऽस्माकमिति ज्ञान बन्धाधिकारे “जं सुह” मित्यादि गाथात्रयेण समुदायपातनिका । अथ बन्धस्वरूपं कथयति—जं सुहमसुहमुदिण्णं भावं रत्तो करेदि जदि अप्पा यं शुभाशुभमुदीर्णं भावं रक्तः करोति यद्यात्मा यद्ययमात्मा निश्चयनयेन शुद्धबुद्धैकस्वभावोऽपि व्यवहारेणानादिबन्धनोपाधिवशाद्रक्तः सन् निर्मलज्ञानानन्दादिगुणास्पदशुद्धात्मस्वरूपपरिणतेः पृथग्भूतामुदयागतं शुभमशुभं वा स्वसंवित्तिच्युतो भूत्वा भावं परिणामं करोति सो तेण हवदि बंधो तदा स आत्मा तेन रागपरिणामेन कर्तृभूतेन बद्धो भवति । केन करणभूतेन । पोग्गलकम्मेण विविहेण कर्मवर्गणारूपपुद्गलकर्मणा विविधेनेति । अत्र शुद्धात्मपरिणतेर्विपरीतशुभाशुभपरिणामो भावबन्धः तन्निमित्तेन तैलम्रक्षितानां मलबन्ध इव जीवेन सह कर्मपुद्गलानां संश्लेषो द्रव्यबन्ध इति सूत्राभिप्रायः ॥ १४७ ॥ अथ बहिरंगान्तरङ्गबन्धकारणमुपदिशति;—

है,—[यदि] जो [रक्तः] अज्ञानभावमें रागी होकर [आत्मा] यह जीवद्रव्य [यं] जिस [शुभं अशुभं] शुभाशुभरूप [उदीर्णं] प्रकट हुये [भावं] भावको [करोति] करता है [सः] वह जीव [तेन] तिस भावसे [विविधेन पुद्गलकर्मणा] अनेक प्रकारके पौद्गलीक कर्मोंसे [बद्धः भवति] बँध जाता है । भावार्थ—जो यह आत्मा परद्रव्य सम्बन्ध अनादि अविनाश सहित होकर कर्मके उदयसे जिस शुभाशुभ भावको करता है तब यह आत्मा उसही कालमें उस अशुद्ध उपयोगरूप भावका निमित्त पाकरके पौद्गलिक कर्मोंसे बँधता है । इससे यह बात भी सिद्ध हुई कि इस आत्माके जो रागद्वेषमोहरूप स्निग्ध शुभअशुभ परिणाम हैं उनका नाम तो भावबन्ध है उस भावबन्धका निमित्त पाकर शुभअशुभरूप कर्मवर्गणामयी पुद्गलोंका जीवके साथ आपसमें परस्पर बंध होना जिसका नाम द्रव्यबंध है ॥ १४७ ॥ आगे बंधके

योगनिमित्तं ग्रहणं योगो मनोवचनकायसंभूतः ।
भावनिमित्तो बन्धो भावो रतिरागद्वेषमोहयुतः ॥ १४८ ॥

ग्रहणं हि कर्मपुद्गलानां जीवप्रदेशवर्तिकर्मस्कन्धानुप्रवेशः । तत् खलु योगनिमित्तं । योगो वाङ्मनःकायकर्मवर्गणालम्बनात्मप्रदेशपरिस्पन्दः । बन्धस्तु कर्मपुद्गलानां विशिष्टशक्तिपरिणामेनावस्थानम् । स पुनर्जीवभावनिमित्तः । जीवभावः पुनः रतिरागद्वेषमोहयुतः । मोहनीयविपाकसंपादितविकार इत्यर्थः । तदत्र पुद्गलानां ग्रहणहेतुत्वाद्बहिरङ्गकारणं योगः । विशिष्टशक्तिस्थितिहेतुत्वादन्तरङ्गकारणं जीवभाव एवेति ॥ १४८ ॥

योगनिमित्तेन ग्रहणं कर्मपुद्गलादानं भवति । योग इति कोऽर्थः । **जोगो मणवयणकायसंभूदो** योगो मनोवचनकायसंभूतः निष्क्रियनिर्विकारचिज्ज्योतिःपरिणामाद्भिन्नो मनोवचनकायवर्गणालंबनरूपो व्यापारः आत्मप्रदेशपरिस्पन्दलक्षणो वीर्यान्तरायक्षयोपशमजनितः कर्मादानहेतुभूतो योगः **भावणिमित्तो बंधो** भावनिमित्तो भवति । स कः । स्थित्यनुभागबन्धः । भावः कथ्यते । **भावो रदिरागदोसमोहजुदो** रागादिदोषरहितचैतन्यप्रकाशपरिणतेः पृथग्भूताः कषायादिदर्शनचारित्रमोहनीयत्रीणि द्वादशभेदात् पृथग्भूतो भावो रतिरागद्वेषमोहयुक्तः । अत्र रतिशब्देन हास्यादिनोकषायान्तर्भूता रतिर्ग्राह्या, रागशब्देन तु मायालोभरूपो रागपरिणाम इति, द्वेषशब्देन तु क्रोधमानारतिशोकभयजुगुप्सारूपो द्वेषपरिणामो षट्प्रकारो भवति, मोहशब्देन दर्शनमोहो गृह्यते इति । अत्र यतः कारणात्कर्मादानरूपेण प्रकृतिप्रदेशबन्धहेतुत्वात

बहिरंग अन्तरंग कारणोंका स्वरूप दिखाते हैं,—[**योगनिमित्तं ग्रहणं**] योगोंका निमित्त पाकर कर्मपुद्गलोंका जीवके प्रदेशोंमें परस्पर एक क्षेत्रावगाहकर ग्रहण होता है [**योगः मनोवचनकायसंभूतः**] योग जो है सो मनवचनकायकी क्रियासे उत्पन्न होता है । [**बंधः भावनिमित्तः**] ग्रहण तो योगोंसे होता है और बंध एक अशुद्धोपयोगरूप भावोंके निमित्तसे होता है और [**भावः**] वह भाव जो है सो कैसा है कि [**रतिरागमोहयुतः**] इष्ट अनिष्ट पदार्थोंमें रतिरागद्वेष मोह करके संयुक्त होता है । **भावार्थ**—जीवोंके प्रदेशोंमें कर्मोंका आगमन तो योगपरिणतिसे होता है पूर्वकी बंधीहुई कर्मवर्गणाओंका अवलंबन पाकर आत्मप्रदेशोंका प्रकंपन होना उसका नाम योगपरिणति है । और विशेषतया निज शक्तिके परिणामसे जीवके प्रदेशोंमें पुद्गलकर्मपिंडोंका रहना उसका नाम बंध है । वह बंध मोहनीयकर्मजनित अशुद्धोपयोगरूप भावके विना जीवके कदाचित् नहीं होता । यद्यपि योगोंके द्वारा भी बंध होता है तथापि स्थिति अनुभागके विना जानकर उसका नाम मात्र ही ग्रहण होता है क्योंकि बंध उसहीका नाम है जो स्थिति अनुभागकी विशेषता लिये हो, इसकारण यह बात सिद्ध हुई

---

१ बन्धः २ योगात् प्रकृतिप्रदेशबन्धौ ।

भवत्यास्रवभावाभावः । आस्रवभावाभावे भवति कर्माभावः । कर्माभावेन भवति सार्वज्ञं सर्वदर्शित्वमव्याबाधमिन्द्रियव्यापारातीतमनन्तसुखत्वञ्चेति । स एष जीवन्मुक्तिनामा भावमोक्षः । कथमिति चेत् । भावः खल्वत्र विवक्षितः कर्मावृतचैतन्यस्य क्रमप्रवर्तमानज्ञप्तिक्रियारूपः । स खलु संसारिणोऽनादिमोहनीयकर्मोदयानुवृत्तिवशादशुद्धो द्रव्यकर्मास्रवहेतुः । स तु ज्ञानिनो मोहरागद्वेषानुवृत्तिरूपेण प्रहीयते । ततोऽस्य आस्रवभावो निरुध्यते । ततो निरुद्धास्रवभावस्यास्य मोहक्षयेणात्यन्तनिर्विकारमनादिमुद्रितानन्तचैतन्य-

चिन्ता भावास्रवस्वरूपेण विना **जायदि कम्मस्स दु णिरोधो** मोहनीयादिघातिचतुष्टयरूपस्य कर्मणो जायते निरोधो विनाशः । इति प्रथमगाथा । **कम्मस्साभावेण य** घातिकर्मचतुष्टयस्याभावेन च **सव्वण्हू सव्वलोयदरिसी य** सर्वज्ञः सर्वलोकदर्शी च सन् । किं करोति । **पावदि** प्राप्नोति । किं । सुहं सुखं । किं विशिष्टं । **इंदियरहिदं अव्वाबाहमणंतं** अतीन्द्रियमव्याबाधमनन्तं चेति । इति संक्षेपेण भावमोक्षो ज्ञातव्यः । तद्यथा । कोसौ भावः कथं मोक्ष इति प्रश्ने प्रत्युत्तरमाह—भावः स त्वत्र विवक्षितः कर्मावृतसंसारिजीवस्य क्षायोपशमिकज्ञानविकल्परूपः । स चानादिमोहोदयवशेन रागद्वेषमोहरूपेणाशुद्धो भवतीति । इदानीं तस्य भावस्य मोक्षः कथ्यते । यदायं जीवः आगमभाषया कालादिलब्धिरूपमध्यात्मभाषया शुद्धात्माभिमुखपरिणामरूपं स्वसंवेदनज्ञानं लभते तदा प्रथमतस्तावन्मिथ्यात्वादिसप्तप्रकृतीनामुपशमेन क्षयोपशमेन च सरागसम्यग्दृष्टिर्भूत्वा पंचपरमेष्ठिभक्त्यादिरूपेण पराश्रितधर्म्यध्यानबहिरंगसहकारि-

आस्रवभावका अभाव **[जायते]** होता है **[तु]** और **[आस्रवभावेन विना]** कर्मका आगमन न होनेसे **[कर्मणः]** ज्ञानावरणादि कर्मबंधका **[निरोधः]** अभाव **[जायते]** होता है । **[च]** और **[कर्मणाम्]** ज्ञानावरणादि कर्मोंका **[अभावेन]** विनाश करके **[सर्वज्ञः]** सबका जाननहारा **[च]** और **[सर्वलोकदर्शी]** सबका देखनहारा होता है तब वह **[इन्द्रियरहितं]** इन्द्रियाधीन नहीं और **[अव्याबाधं]** बाधारहित **[अनन्तं]** अपार ऐसे **[सुखं]** आत्मीक सुखको **[प्राप्नोति]** प्राप्त होता है । **भावार्थ**—जीवके आस्रवका कारण मोहरागद्वेषरूप परिणाम है जब इन तीन अशुद्ध भावोंका विनाश होय तब ज्ञानी जीवके अवश्य ही आस्रवभावोंका अभाव होता है । जब ज्ञानीके आस्रवभावका अभाव होता है तब कर्मका नाश होता है कर्मोंके नाश होनेपर निरावरण सर्वज्ञपद तथा सर्वदर्शीपद प्रगट होता है । और अखंडित अतीन्द्रिय अनन्त सुखका अनुभवन होता है इस पदका नाम जीवन्मुक्त भावमोक्ष कहा जाता है इसप्रकार जीव रहता हुआ भावकर्मरहित सर्वथा शुद्ध भावसंयुक्त मुक्त है इसकारण जीव मुक्त कहाते हैं । जो कोई पूछे कि किसप्रकार जीव मुक्त होते हैं सो कहते हैं कि कर्मकर आच्छादित जो भाव क्रमसे प्रवर्ते है जो ज्ञान क्रियारूप भाव सो संसारी जीवके अनादि मोहनीयकर्मके बलसे अशुद्ध है द्रव्यकर्मके आस्रव

वीर्यस्य शुद्धज्ञप्तिक्रियारूपेणान्तर्मुहूर्तमतिवाह्य युगपज्ज्ञानदर्शनावरणान्तरायक्षयेण कथञ्चित् कूटस्थज्ञानतामवाप्य ज्ञप्तिक्रियारूपे क्रमप्रवृत्त्यभावाद् भावकर्म विनश्यति । ततः कर्माभावे स हि भगवान्सर्वज्ञः सर्वदर्शी व्युपरतेन्द्रियव्यापारोऽव्याबाधानन्तसुखश्च नित्यमेवावतिष्ठते । इत्येष भावकर्ममोक्षप्रकारः द्रव्यकर्ममोक्षहेतुः परमसंवरप्रकारश्च ॥ १५०।१५१॥

द्रव्यकर्ममोक्षहेतुपरमनिर्जराकारणध्यानाख्यानमेतत्,—

दंसणणाणसमग्गं झाणं णो अण्णदव्वसंजुत्तं ।
जायदि णिज्जरहेदू सभावसहिदस्स साधुस्स ॥ १५२ ॥

रित्वेनानन्तज्ञानादिस्वरूपोऽहमित्यात्मभावनास्वरूपमाश्रित्य धर्मध्यानं प्राप्य आगमकथितक्रमेणासंयतसम्यग्दृष्ट्यादिगुणस्थानचतुष्टयमध्ये क्वापि गुणस्थाने दर्शनमोहक्षयेण क्षायिकसम्यक्त्वं कृत्वा तदनन्तरमपूर्वादिगुणस्थानेषु प्रकृतिपुरुषनिर्मलविवेकज्योतीरूपप्रथमशुक्लध्यानमनुभूय रागद्वेषरूपचारित्रमोहोदयाभावेन निर्विकारशुद्धात्मानुभूतिरूपं चारित्रमोहविध्वंसनसमर्थं वीतरागचारित्रं प्राप्य मोहक्षपणं कृत्वा मोहक्षयानन्तरं क्षीणकषायगुणस्थानेऽन्तर्मुहूर्तकालं स्थित्वा द्वितीयशुक्लध्यानेन ज्ञानदर्शनावरणान्तरायकर्मत्रयं युगपदन्त्यसमये निर्मूल्य केवलज्ञानाद्यनन्तचतुष्टयस्वरूपं भावमोक्षं प्राप्नोतीति भावार्थः ॥ १५० । १५१ ॥ एवं भावमोक्षस्वरूपकथनरूपेण गाथाद्वयं गतं । अथ वेदनीयादिशेषाघातिकर्मचतुष्टयविनाशरूपायाः सकलद्रव्यनिर्जरायाः कारणं ध्यानं

वका कारण है सो भावज्ञानी जीवके मोहरागद्वेषरूपी प्रवृत्तिसे कमी होता है अतएव इस भेदविज्ञानीके आस्रवभावका निरोध होता है । जब इसके मोहकर्मका क्षय होता है तब इसके अनन्त निर्विकार वीतराग चारित्र प्रगट होता है अनादिकालसे आस्रव आवरण द्वारा अनन्त चैतन्यशक्ति इस आत्माकी मुद्रित (ढकीहुई) है वही इस ज्ञानीके शुद्ध-क्षायोपशमिक निर्मोहज्ञानक्रियाके होतेसते अन्तर्मुहूर्तपर्यन्त रहता है तत्पश्चात् एक ही समयमें ज्ञानावरण दर्शनावरण अन्तराय कर्मके क्षय होनेसे कथंचित्प्रकार कूटस्थ अचल केवलज्ञान अवस्थाको प्राप्त होता है उससमय ज्ञानक्रियाकी प्रवृत्ति क्रमसे नहीं होती क्योंकि भावकर्मका अभाव है सो ऐसी अवस्थाके होनेसे वह भगवान् सर्वज्ञ सर्वदर्शी इन्द्रियव्यापाररहित अव्याबाध अनन्त सुखसंयुक्त सदाकाल थिरस्वभावसे स्वरूपगुप्त रहते हैं । यह भावकर्मसे मुक्तका स्वरूप दिखाया, और यह ही द्रव्यकर्मसे मुक्त होनेका कारण परम संवरका स्वरूप है । जब यह जीव केवलज्ञानदशाको प्राप्त होता है तब इसके चार अघातिया कर्म जलीहुई जेवडीकी तरह द्रव्यकर्म रहते हैं । उन द्रव्यकर्मोंके नाशको अनन्त चतुष्टय परम संवर कहते हैं ॥ १५० ॥ १५१ ॥ आगे द्रव्यकर्म मोक्षका कारण और परम निर्जराका कारण ध्यानका स्वरूप दिखाते हैं,–[**दर्शनज्ञानसमग्रं**]

१ निःसंज्ञात्वम् ।

व्यपदेशार्हमात्मन स्वरूप पूर्वसंचितकर्मणा शक्तिशातन वा विलोक्य निर्जराहेतुत्वेनोपवर्ण्यत इति ॥ १५२ ॥

द्रव्यमोक्षस्वरूपाख्यानमेतत्,—

जो संवरेण जुत्तो णिज्जरमाणोध सव्वकम्माणि ।
ववगदवेदाउस्सो मुयदि भव तेण सो मोक्खो ॥ १५३ ॥

य संवरेण युक्तो निर्जरन्नथ सर्वकर्माणि ।
व्यपगतवेद्यायुष्को मुञ्चति भव तेन स मोक्ष ॥ १५३ ॥

णुरिति कोऽर्थ रागादिविकल्परहिता सूक्ष्मावस्था । तस्या सूक्ष्मत्व कथमिति चेत् । इंद्रियमनोविकल्पाविषयत्वादिति भावपरमाणुशब्दस्य व्याख्यान ज्ञातव्य । अयमत्र भावार्थ —प्राथमिकानां चित्तस्थिरीकरणार्थं विषयाभिलाषरूपध्यानवञ्चनार्थं च परपरया मुक्तिकारण पचपरमेष्ठ्यादिपरद्रव्य ध्येय भवति दृढतरध्यानाभ्यासेन चित्ते स्थिरे जाते सति निजशुद्धात्मस्वरूपमेव ध्येय । तथा चोक्तम् श्रीपूज्यपादस्वामिभि निश्चयध्येयव्याख्यान । आत्मानमात्मा आत्मन्येवात्मनात्मा क्षणमुपजनयन्सन् स्वयभू प्रवृत्त । अस्य व्याख्यान क्रियते । आत्मा कर्ता आत्मान कर्मतापन्न आत्मन्येवाधिकरणभूते आत्मना करणभूतेन असौ प्रत्यक्षीभूतात्मा क्षणमन्तर्मुहूर्तमुपजनयन् धारयन् सन् स्वयभू प्रवृत्त सर्वज्ञो जात इत्यर्थ । इति परस्परसापेक्षनिश्चयव्यवहारनयाभ्या साध्यसाधकभाव ज्ञात्वा ध्येयविषये विवादो न कर्तव्य ॥ १५२ ॥ अथ सकलमोक्षमङ्ग द्रव्यमोक्षमावेदयति,—**जो** य कर्ता **संवरेण जुत्तो** परमसंवरेण युक्त । किं कुर्वन् । **णिज्जरमाणो य** निर्जरयथ । कानि । **सव्वकम्माणि** सर्वकर्माणि । पुन किंविशिष्ट । **ववगदवेदाउस्सो** व्यपगतवेदनीयायुर्नामगोत्रकर्मद्वय । एवभूत स किंकरोति । **मुअदि भव** त्यजति

नसे रहित होता है । ज्ञानावरण दर्शनावरण कर्मके जानेपर अनन्तज्ञान अनन्त दर्शनसे शुद्धचेतनामयी होता है इसकारण अतीन्द्रिय रसका आस्वादी होकर बाह्य पदार्थोंके रसको नहीं भोगता । और वही परमेश्वर अपने शुद्ध स्वरूपमें अखडित चैतन्यस्वरूपम प्रवर्त्ते है । इसकारण कथंचित्प्रकार अपने स्वरूपका ध्यानी भी है अर्थात् परद्रव्यसयोगसे रहित आत्मस्वरूपध्यान नामको पाता है इसकारण केवलीके भी उपचारमात्र स्वरूपअनुभवनकी अपेक्षा ध्यान कहा जाता है । पूर्वबधे कर्म अपनी शक्तिकी कमीसे समय समय खिरते रहते हैं, इसकारण वहाँ ध्यान निर्जराका कारण है । यह भावमोक्षका स्वरूप जानना ॥ १५२ ॥ आगें द्रव्यमोक्षका स्वरूप कहते हैं,–[**यः**] जो पुरुष [**संवरेण युक्त**] आत्मानुभवरूप परमसंवरसे संयुक्त है [**अथ**] अथवा [**सर्वकर्माणि**] अपने समस्त पूर्वबन्ध कर्मोंको [**निर्जरन्**] अनुक्रमसे खपाता हुआ प्रवर्त्ते है । और जो पुरुष [**व्यपगतवेद्यायुष्क**] दूर गया है वेदनीय नाम गोत्र आयु

वादनिंदितं तच्चरितं, तदेव मोक्षमार्ग इति । द्विविधं हि किल संसारिषु चरितं । स्वच-रितं परचरितं च । स्वसमयपरसमयावित्यर्थः । तत्र स्वभावावस्थितास्तित्वस्वरूपं स्वचरितम् । परभावावस्थितास्तित्वस्वरूपं परचरितम् । तत्र यत्स्वभावावस्थितास्तित्वरूपं परभा-वावस्थितास्तित्वव्यावृत्तत्वेनात्यन्तमनिन्दितम्, तदत्र साक्षान्मोक्षमार्गत्वेनावधारणीय-मिति ॥ १५४ ॥

भणियं चरितं च तयोर्नियतमस्तित्वमनिंदितं भणितं कथितं । किं । चारित्रं च । किं तत् । अस्तित्वं । किंविशिष्टं । तयोर्ज्ञानदर्शनयोर्नियतं स्थितं । पुनरपि किंविशिष्टं । रागादभावाद-निंदितं, इदमेव चरितं मोक्षमार्ग इति । अथवा द्वितीयव्याख्यानं । न केवलं केवलज्ञानदर्शनद्वयं जीवस्वभावो भवति किंतु पूर्वोक्तलक्षणं चरितं स्वरूपास्तित्वं चेति । इतो विस्तर:— समस्तवस्तुगतानंतधर्माणां युगपद्विशेषपरिच्छित्तिसमर्थं केवलज्ञानं तथा सामान्ययुग-पत्परिच्छित्तिसमर्थं केवलदर्शनमिति जीवस्वभावः । कस्मादिति चेत् । सहजशुद्ध-सामान्यविशेषचैतन्यात्मकजीवास्तित्वात्सकाशात्संज्ञालक्षणप्रयोजनादिभेदेपि द्रव्यक्षेत्रकालभावैर-भेदादिति पूर्वोक्तजीवस्वभावादभिन्नमुत्पादव्ययध्रौव्यात्मकमिंद्रियव्यापाराभावान्निर्विकारमदूषितं चेत्येवं गुणविशिष्टस्वरूपास्तित्वं जीवस्वभावनियतचरितं भवति । तदपि कस्मात् । स्वरूपे चरणं चारित्रमितिवचनात् । तच्च द्विविधं स्वयमनाचरतोपि परानुभूतेष्टकामभोगेषु स्मरणमपध्या-नलक्षणमिति तदादि परभावपरिणमनं परचारितं तद्विपरीतं स्वचरितं । इदमेव चारित्रं परमार्थशब्द-वाच्यस्य मोक्षस्य कारणं न चान्यदित्यजानता मोक्षाद्भिन्नस्यासारसंसारस्य कारणभूतेषु मिथ्यात्वरा-गादिषु निरतानामस्माकमेवानंतकालो गतः, एवं ज्ञात्वा तदेव जीवस्वभावनियतचरितं मोक्षकारणभूतं निरंतरं भावनीयमिति सूत्रतात्पर्यं । तथाचोक्तं । "एमेव गओ कालो असारसंसारकारणरयाण ।

जो है सो [अनिन्दित] निर्मल [चारित्र] आचरणरूप चारित्रगुण [भणित] सर्वज्ञ वीतरागदेवने कहा है । भावार्थ—जीवके स्वभाव भावोंकी जो थिरता है, उसका नाम चारित्र, कहाजाता है वही चारित्र मोक्षमार्ग है । वे जीवके स्वाभाविक भाव ज्ञान दर्शन हैं और वे आत्मासे अभेद और भेदस्वरूप हैं । एक चैतन्यभावकी अपेक्षा अभेद हैं और वह ही एक चैतन्यभाव सामान्यविशेषकी अपेक्षा दो प्रकारका है दर्शन सामान्य है ज्ञानका स्वरूप विशेष है चेतनाकी अपेक्षा ये दोनो एक हैं ये ज्ञानदर्शन जीवके स्वरूप हैं, इनका जो निश्चल थिर होना अपनी उत्पादव्ययध्रुवतासे और रागादिक परिणतिके अभावसे निर्मल होना उसका नाम चारित्र है वही मोक्षका मार्ग है । इस संसारमें चारित्र दो प्रकारका है । एक स्वचारित्र और दूसरा परचारित्र है । स्वचारित्रको स्वसमय और परचारित्रको परसमय कहते हैं । जो परमात्मामें थिरभाव सो तो स्वचारित्र है और जो आत्माका परद्रव्यमें लगनरूप थिरभाव सो परचारित्र है । इनमेंसे जो आत्मा भावोंमें थिरताकर

यावत् । अथ खलु यदि कथञ्चनोद्भिन्नसम्यग्ज्ञानज्योतिर्जीवः परसमयं व्युदस्य स्वसमयमुपादत्ते तदा कर्मबन्धादवश्यं भ्रश्यति । यतो हि जीवस्वभावनियतं चरितं मोक्षमार्ग इति ॥ १५५ ॥

परचरितप्रवृत्तस्वरूपाख्यानमेतत्,—

जो परदव्वम्मि सुहं असुहं रागेण कुणदि जदि भावं ।
सो सगचरित्तभट्ठो परचरियचरो हवदि जीवो ॥ १५६ ॥

यः परद्रव्ये शुभमशुभं रागेण करोति यदि भावं ।
स स्वकचरित्रभ्रष्टः परचरितचरो भवति जीवः ॥ १५६ ॥

यो हि मोहनीयोदयानुवृत्तिवशाद्रज्यमानोपयोगः सन्, परद्रव्ये शुभमशुभं वा भाव-

---

कर्मबंधात् तदा केवलज्ञानाद्यनंतगुणव्यक्तिरूपो मोक्षात्प्रतिपक्षभूतो योऽसौ बंधस्तस्माच्च्युतो भवति । ततो ज्ञायते स्वसंवित्तिलक्षणस्वसमयरूपं जीवस्वभावनियतचरितमेव मोक्षमार्ग इति भावार्थः ॥१५५॥ एवं स्वसमयपरसमयभेदसूचनरूपेण गाथा गता। अथ परसमयपरिणतपुरुषस्वरूपं पुनरपि व्यक्तीकरोति,—**जो परदव्वह्मि सुहं असुहं रायेण कुणदि जदि भावं** यः परद्रव्ये शुभमशुभं वा रागेण करोति यदि भावं **सो सगचरित्तभट्ठो** सः स्वकचरित्रभ्रष्टः सन् **परचरियचरो हवदि जीवो** परचरित्रचरो भवति जीव इति । तथाहि—यः कर्ता शुद्धगुणपर्याय-

---

बन्ध होनेसे **[प्रभ्रश्यति]** रहित होता है । **भावार्थ**—यद्यपि यह संसारी जीव अपने निश्चित स्वभावसे ज्ञानदर्शनमें तिष्ठै है तथापि अनादि मोहनीय कर्मके वशीभूत होनेसे अशुद्धोपयोगी होकर अनेक परभावोंको धारण करता है । इस कारण निजगुणपर्यायरूप नहीं परिणमता परसमयरूप प्रवर्तै है । इसीलिये परचारित्रके आचरनेवाला कहा जाता है । और वह ही जीव यदि काल पाकर अनादिमोहिनीयकर्मकी प्रवृत्तिको दूर करके अत्यन्त शुद्धोपयोगी होता है और अपने एक निजरूपको ही धारै है, अपने ही गुणपर्यायोंमें परिणमता है, स्वसमयरूप प्रवर्तै है तब आत्मीक चारित्रका धारक कहा जाता है । जो यह आत्मा किसी प्रकार निसर्ग अथवा अधिगमसे प्रगट हो सम्यग्ज्ञान ज्योतिमयी होता है, परसमयको त्याग कर स्वसमयको अंगीकार करता है तब यह आत्मा अवश्य ही कर्मबन्धसे रहित होता है क्योंकि निश्चल भावाके आचरणसे ही मोक्ष सधता है ॥१५५॥ आगे परचारित्ररूप परसमयका स्वरूप कहा जाता है,—**[यः]** जो अविद्या विद्याका मलीन जीव **[परद्रव्ये]** आत्मीक वस्तुसे विपरीत परद्रव्यमें **[रागेण]** मदिरापानवत् मोहरूपभावसे **[यदि]** जो **[शुभं]** दान भक्ति सयमादि भाव अथवा **[अशुभं भावं]** विषयकषायादि अशुभ भावको **[करोति]** करता है **[सः जीवः]** वह जीव **[स्वकचरित्रभ्रष्टः]** आत्मीक शुद्धाचरणसे रहित **[परचरितचरः]** परसमयका आचरणवाला **[भवति]** होता

माददाति स स्वकचरित्रभ्रष्टः परचरितचर इति उपगीयते । यतो हि स्वद्रव्ये शुद्धोपयोगवृत्तिः स्वचरितं । परद्रव्ये सोपरागोपयोगवृत्तिः परचरितमिति ॥ १५६ ॥

परचरितप्रवृत्तेर्बन्धहेतुत्वेन मोक्षमार्गत्वनिषेधनमेतत्,—

आसवदि जेण पुण्णं पावं वा अप्पणोध भावेण ।
सो तेण परचरित्तो हवदित्ति जिणा परूवंति ॥ १५७ ॥

आस्रवति येन पुण्यं पापं वात्मनोऽथ भावेन ।
स तेन परचरित्रः भवतीति जिना प्ररूपयन्ति ॥ १५७ ॥

इह किल शुभोपरक्तो भावः पुण्यास्रवः । अशुभोपरक्तः पापास्रव इति । तत्र पुण्य

रिणतिरिजशुद्धात्मद्रव्यात्परिभ्रष्टो भूत्वा [illegible] रागभावेन परिणम्य शुभाशु भपरद्रव्योपेक्षालक्षणाच्छुद्धोपयोगाद्विपरीतः समस्तपरद्रव्येषु शुभमशुभं वा भावं करोति स ज्ञानानन्दैकस्वभावात्मा [illegible] सन् [illegible] परचरित्रचरो भवतीति सूत्राभिप्रायः ॥ १५६ ॥ अथ परचरित्रपरिणतपुरुषस्य बन्धं दृष्ट्वा मोक्षं निषेधयति । अथवा पूर्वोक्तमेव परसमयस्वरूपं दृढयति [illegible],—आसवदि जेण पुण्णं पावं वा आस्रवति येन पुण्यं पापं वा येन [illegible]। किं । पुण्यं पापं वा । येन येन । भावेन परिणामेन । कस्य भावेन । अप्पणो आत्मनः अथ अहो सो तेण परचरित्तो हवदित्ति जिणा परूवेंति स जीवो [illegible]

है । भावार्थ—जो कोई पुरुष मोहकर्मके विपाकके वशीभूत होनेसे रागरूप परिणामोंसे अशुद्धोपयोगी होता है विकल्पी होकर परमें शुभाशुभ भावोंको करता है सो स्वरूपाचरणसे भ्रष्ट होकर परवस्तुका आचरण करता हुवा परसमयी है ऐसा भगवंत पुरुषोंने कहा है । आगममें प्रसिद्ध है कि आत्मीकभावोंमें शुद्धोपयोगकी प्रवृत्ति होना सो स्वसमय है और परद्रव्यमें अशुद्धोपयोगकी प्रवृत्ति होना सो परसमय है । यह [illegible] रसके भावकी पुरुषोंका विलास है ॥ १५६ ॥ आगे जो पुरुष परसमयमें प्रवर्ते है उसके बन्धका कारण है और मोक्षमार्गका निषेध है ऐसा कथन करते हैं—[येन] जिस [भावेन] अशुद्धोपयोगरूप परिणामसे [आत्मनः] संसारी जीवके [पुण्यं] शुभ [अथ वा] तथा [पापं] अशुभरूप कर्मवर्गणा [आस्रवति] आस्रवण होता है [सः] वह आत्मा [तेन] तिस अशुद्धभावसे [परचरित्रः] परसमयका आचरण करता । [भवति] होता है [इति] ऐसा [जिनाः] [illegible] [प्ररूपयन्ति] कहते हैं । भावार्थ— [illegible]

[illegible]

पाप वा येन भावेनास्रवति यस्य जीवस्य यदि स भावो भवति स जीवस्तदा तेन परच-रित इति प्ररूप्यते । तत परचरितप्रवृत्तिर्बन्धमार्ग एव न मोक्षमार्ग ॥ १५७ ॥

स्वचरितप्रवृत्तस्वरूपाख्यानमेतत् ,—

जो सव्वसंगमुक्को णण्णमणो अप्पणं सहावेण ।
जाणदि पस्सदि णियदं सो सगचरियं चरदि जीवो ॥ १५८ ॥

य सर्वसङ्गमुक्त अनन्यमना आत्मानं स्वभावेन ।
जानाति पश्यति नियत स स्वकचरितं चरति जीव ॥ १५८ ॥

यं खलु निरुपरागोपयोगत्वात्सर्वसङ्गमुक्त, परद्रव्यव्यावृत्तोपयोगत्वादनन्यमना आत्मानं स्वभावेन ज्ञानदर्शनरूपेण जानाति, पश्यति, नियतमवस्थितत्वेन । स खलु

